ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

## (वाक्य सहित)

# षष्ठकाण्डे तृतीयः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **September 30, 2021**

# Version Notes:

**This is now the current Version 1.0 dated September 30, 2021.**

1. This replaces the earlier version 0.0 dated October 31, 2019.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till September 30, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 31st Oct 2019 |

# Contents


**6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं 4**

**6.3 षष्ठकाण्डे तृतीयः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं... 4**

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 6 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे षष्ठं काण्डं

## 6.3 षष्ठकाण्डे तृतीयः प्रश्नः – सोममन्त्रब्राह्मणनिरूपणं

**TS 6.3.1.1**

चात्वालाद्–धिष्णियानुप वपति योनिर्वै यज्ञस्य चात्वालं ँयज्ञस्य सयोनित्वाय देवा वै यज्ञं परा ऽजयन्त तमाग्नीद्ध्रात् पुनरपाजयन्नेतद् वै यज्ञस्या–पराजितं ँयदाग्नीद्ध्रं ँयदाग्नीद्ध्राद्–धिष्णियान्. विहरति यदेव यज्ञस्या–पराजितं तत एवैनं पुनस्तनुते पराजित्येव खलु वा एते यन्ति ये बहिष्पवमानꣳ सर्पन्ति बहिष्पवमाने स्तुत– [ ] 1

**TS 6.3.1.1 - Padam**

चात्वालात् । धिष्णियान् । उपेति । वपति । योनिः । वै । यज्ञस्य । चात्वालम् । यज्ञस्य । सयोनित्वायेति सयोनि – त्वाय । देवाः । वै । यज्ञम् । परेति । अजयन्त । तम् । आग्नीद्ध्रादित्याग्नि – इद्ध्रात् । पुनः । अपेति । अजयन्न् । एतत् । वै । यज्ञस्य ।

अपराजितमित्यपरा - जितम् । यत् ।

आग्नीद्ध्रमित्याग्नि - इद्ध्रम् । यत् ।

आग्नीद्ध्रादित्याग्नि - इद्ध्रात् । धिष्णियान् । विहरतीति वि-हरति ।

यत् । एव । यज्ञस्य । अपराजितमित्यपरा - जितम् । ततः । एव ।

एनम् । पुनः । तनुते । पराजित्येति परा-जित्य । इव । खलु । वै ।

एते । यन्ति । ये । बहिष्पवमानमिति बहिः - पवमानम् । सर्पन्ति ।

बहिष्पवमान इति बहिः - पवमाने । स्तुते । **1 (50)**

**TS 6.3.1.2**

आहाग्नीदग्नीन्. वि हर बर्.हिः स्तृणाहि पुरोडाशाꣳ अलं कुर्विति

यज्ञमेवापजित्य पुनस्तन्वाना यन्त्यङ्गारैर्द्वे सवने वि हरति

शलाकाभि-स्तृतीयꣳ सशुक्रत्वायाथो सं भरत्येवैनद्-धिष्णिया

वा अमुष्मिन् ँल्लोके सोममरक्षन् तेभ्यो ऽधि सोममा ऽहरन् त

मन्ववायन् तं पर्यविशन्. य एवं ँवेद विन्दते- [ ] **2**

**TS 6.3.1.2 - Padam**

आह । अग्नीदित्यग्नि – इत् । अग्नीन् । वीति । हर । बर्.हिः ।
स्तृणाहि । पुरोडाशान् । अलम् । कुरु । इति । यज्ञम् । एव ।
अपजित्येत्यप–जित्य । पुनः । तन्वानाः । यन्ति । अङ्गारैः । द्वे इति ।
सवने इति । वीति । हरति । शलाकाभिः । तृतीयम् । सशुक्रत्वायेति
सशुक्र – त्वाय । अथो इति । समिति । भरति । एव । एनत् ।
धिष्णियाः । वै । अमुष्मिन्न् । लोके । सोमम् । अरक्षन्न् । तेभ्यः ।
अधीति । सोमम् । एति । अहरन्न् । तम् ।
अन्ववायन्नित्यनु–अवायन्न् । तम् । परीति । अविशन्न् । य । एवम् ।
वेद । विन्दते । **2 (50)**

**TS 6.3.1.3**

परिवेष्टारं ते सोमपीथेन व्यार्द्ध्यन्त ते देवेषु सोमपीथमैच्छन्त तान्
देवा अब्रुवन् द्वेद्वे नामनी कुरुद्ध्वमथ प्र वा ऽऽफ्स्यथ न वेत्यग्नयो
वा अथ धिष्णियास्तस्माद् द्विनामा ब्राह्मणो ऽर्द्धुकस्तेषां ँये नेदिष्ठं
पर्यविशन् ते सोमपीथं प्राऽऽप्नुवन्नाहवनीय आग्नीद्ध्रीयो होत्रीयो
मार्जालीयस्तस्मात् तेषु जुह्वत्यतिहाय वषट् करोति वि ह्ये– [ ] **3**

**TS 6.3.1.3 - Padam**

परिवेष्टारमिति परि – वेष्टारम् । ते । सोमपीथेनेति सोम – पीथेन ।

वीति । आर्द्ध्यन्त । ते । देवेषु । सोमपीथमिति सोम – पीथम् ।

ऐच्छन्त । तान् । देवाः । अब्रुवन्न् । द्वे द्वे इति द्वे–द्वे । नामनी इति ।

कुरुद्ध्वम् । अथ । प्रेति । वा । आफ्स्यथ । न । वा । इति ।

अग्नयः । वै । अथ । धिष्णियाः । तस्मात् । द्विनामेति द्वि – नामा ।

ब्राह्मणः । अर्द्धुकः । तेषाम् । ये । नेदिष्ठम् ।

पर्यविशन्निति परि – अविशन्न् ।

ते । सोमपीथमिति सोम – पीथम् । प्रेति । आप्नुवन्न् ।

आहवनीय इत्या – हवनीयः । आग्नीद्ध्रीय इत्याग्नि – इद्ध्रीयः ।

होत्रीयः । मार्जालीयः । तस्मात् । तेषु । जुह्वति ।

अतिहायेत्यति–हाय । वषट् । करोति । वीति । हि । **3 (50)**

**TS 6.3.1.4**

–ते सोमपीथेनाऽऽर्द्ध्यन्त देवा वै याः प्राची–राहुती–रजुहवुर्ये

पुरस्तादसुरा आसन् ता७ स्ताभिः प्राणुदन्त याः प्रतीचीर्ये पश्चादसुरा

आसन् ता७ स्ताभि–रपानुदन्त प्राचीरन्या आहुतयो हूयन्ते

प्रत्यङ्ङासीनो धिष्णियान् व्याघारयति पश्चाच्चैव पुरस्ताच्च यजमानो

भ्रातृव्यान् प्र णुदते तस्मात् पराचीः प्रजाः प्र वीयन्ते प्रतीची– [ ] **4**

**TS 6.3.1.4 - Padam**

एते । सोमपीथेनेति सोम – पीथेन । आर्द्ध्यन्त । देवाः । वै ।

याः । प्राचीः । आहुतीरित्या – हुतीः । अजुहवुः । ये । पुरस्तात् ।

असुराः । आसन्न् । तान् । ताभिः । प्रेति । अनुदन्त । याः ।

प्रतीचीः । ये । पश्चात् । असुराः । आसन्न् । तान् । ताभिः । अपेति ।

अनुदन्त । प्राचीः । अन्याः । आहुतय इत्या – हुतयः । हूयन्ते ।

प्रत्यङ्ङ् । आसीनः । धिष्णियान् । व्याघारयतीति वि – आघारयति ।

पश्चात् । च । एव । पुरस्तात् । च । यजमानः । भ्रातृव्यान् । प्रेति ।

नुदते । तस्मात् । पराचीः । प्रजा इति प्र–जाः । प्रेति । वीयन्ते ।

प्रतीचीः । **4 (50)**

**TS 6.3.1.5**

र्जायन्ते प्राणा वा एते यद्–धिष्णिया यदद्ध्वर्युः प्रत्यङ् धिष्णिया–

नतिसर्पेत् प्राणान्थ् सं कर्.षेत् प्रमायुकः स्यान्नाभिर्वा एषा यज्ञस्य

यद्धोतोर्द्ध्वः खलु वै नाभ्यै प्राणो ऽवाङपानो यदध्वर्युः प्रत्यङ् होतारमतिसर्पेदपाने प्राणं दध्यात् प्रमायुकः स्यान्नाद्ध्वर्युरुप गायेद् वाग्वीर्यो वा अद्ध्वर्यु–र्यदद्ध्वर्यु–रुपगाये–दुद्गात्रे– [ ] **5**

**TS 6.3.1.5 - Padam**

जायन्ते । प्राणा इति प्र–अनाः । वै । एते । यत् । धिष्णियाः । यत् । अद्ध्वर्युः । प्रत्यङ्ङ् । धिष्णियान् । अतिसर्पेदित्यति – सर्पेत् । प्राणानिति प्र – अनान् । समिति । कर्.षेत् । प्रमायुक इति प्र – मायुकः । स्यात् । नाभिः । वै । एषा । यज्ञस्य । यत् । होता । ऊर्द्ध्वः । खलु । वै । नाभ्यै । प्राण इति प्र – अनः । अवाङ् । अपान इत्यप – अनः । यत् । अद्ध्वर्युः । प्रत्यङ्ङ् । होतारम् । अतिसर्पेदित्यति – सर्पेत् । अपान इत्यप – अने । प्राणमिति प्र – अनम् । दद्ध्यात् । प्रमायुक इति प्र – मायुकः । स्यात् । न । अद्ध्वर्युः । उपेति । गायेत् । वाग्वीर्य इति वाक् – वीर्यः । वै । अद्ध्वर्युः । यत् । अद्ध्वर्युः । उपगायेदित्युप – गायेत् । उद्गात्र इत्युत् – गात्रे । **5 (50)**

**TS 6.3.1.6**

वाचꣳ सं प्र यच्छे–दुपदासुका ऽस्य वाख् स्याद्–ब्रह्मवादिनो वदन्ति नासꣳस्थिते सोमेऽद्ध्वर्युः प्रत्यङ्ख् सदो ऽतीयादथ कथा दाक्षिणानि होतुमेति यामो हि स तेषां कस्मा अह देवा यामं ँवा ऽयामं ँवा ऽनु ज्ञास्यन्तीत्यु–त्तरेणाऽऽग्नीद्ध्रं परीत्य जुहोति दाक्षिणानि न प्राणान्थ् सं कर्.षति न्यन्ये धिष्णिया उप्यन्ते ( ) नान्ये यान् निवपति तेन तान् प्रीणाति यान् न निवपति यदनुदिशति तेन तान् ॥ **6**

**TS 6.3.1.6 - Padam**

वाचम् । सम् । प्रेति । यच्छेत् । उपदासुकेत्युप–दासुका । अस्य । वाक् । स्यात् । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । न । असꣳस्थित इत्यसं – स्थिते । सोमे । अद्ध्वर्युः । प्रत्यङ्ङ् । सदः । अतीति । इयात् । अथ । कथा । दाक्षिणानि । होतुम् । एति । यामः । हि । सः । तेषाम् । कस्मै । अह । देवाः । यामम् । वा । अयामम् । वा । अन्विति । ज्ञास्यन्ति । इति । उत्तरेणेत्युत्– तरेण । आग्नीद्ध्रमित्याग्नि – इद्ध्रम् । परीत्येति परि – इत्य । जुहोति । दाक्षिणानि । न । प्राणानिति प्र – अनान् । समिति । कर्.षति ।

नीति । अन्ये । धिष्णियाः । उप्यन्ते ( ) । न । अन्ये । यान् ।
निवपतीति नि – वपति । तेन । तान् । प्रीणाति । यान् । न ।
निवपतीति नि – वपति । यत् । अनुदिशतीत्यनु – दिशति । तेन ।
तान् ॥ **6 (64)** ***(स्तुते – विन्दते – हि – वीयन्ते प्रतीची – रुद्ग्रात्र – उप्यन्ते – चतुर्दश च) (A1)***

**TS 6.3.2.1**

सुवर्गाय वा एतानि लोकाय हूयन्ते यद् वैसर्जनानि द्वाभ्यां गार्.हपत्ये जुहोति द्विपाद् यजमानः प्रतिष्ठित्या आग्नीद्ध्रे जुहोत्यन्तरिक्ष एवाऽऽक्रमत आहवनीये जुहोति सुवर्गमेवैनं ँल्लोकं गमयति देवान्. वै सुवर्गं ँल्लोकं ँयतो रक्षाँस्यजिघाँसन् ते सोमेन राज्ञा रक्षाँस्यपहत्याप्तु–मात्मानं कृत्वा सुवर्गं ँल्लोकमायन् रक्षसा–मनुपलाभायाऽऽत्तः सोमो भवत्यथ– [ ] **7**

**TS 6.3.2.1 - Padam**

सुवर्गायेति सुवः – गाय । वै । एतानि । लोकाय । हूयन्ते । यत् ।
वैसर्जनानि । द्वाभ्याम् । गार्.हपत्य इति गार्.ह – पत्ये । जुहोति ।

द्विपादिति द्वि - पात् । यजमानः । प्रतिष्ठित्या इति प्रति - स्थित्यै ।

आग्नीद्ध्र इत्याग्नि-इद्ध्रे । जुहोति । अन्तरिक्षे । एव । एति ।

क्रमते । आहवनीय इत्या - हवनीये । जुहोति । सुवर्गमिति

सुवः - गम् । एव । एनम् । लोकम् । गमयति । देवान् । वै ।

सुवर्गमिति सुवः - गम् । लोकम् । यतः । रक्षाꣳसि ।

अजिघाꣳसन्न् । ते । सोमेन । राज्ञा । रक्षाꣳसि ।

अपहत्येत्यप - हत्य । अप्तुम् । आत्मानम् । कृत्वा ।

सुवर्गमिति सुवः - गम् । लोकम् । आयन्न् । रक्षसाम् ।

अनुपलाभायेत्यनुप - लाभाय । आत्तः । सोमः ।

भवति । अथ । **7 (50)**

**<u>TS 6.3.2.2</u>**

वैसर्जनानि जुहोति रक्षसामपहत्यै त्वꣳ सोम तनूकृद्भ्य इत्याह

तनूकृद्ध्येष द्वेषोभ्यो ऽन्यकृतेभ्य इत्याहान्यकृतानि हि रक्षाꣳस्युरु

यन्ता ऽसि वरूथमित्याहोरु ण स्कृधीति वावैतदाह जुषाणो

अप्तु-राज्यस्य वेत्वित्याहाप्तुमेव यजमानं कृत्वा सुवर्गं ँल्लोकं गमयति रक्षसा-मनुपलाभायाऽऽ सोमं ददत- [ ] **8**

**TS 6.3.2.2 - Padam**

वैसर्जनानि । जुहोति । रक्षसाम् । अपहत्या इत्यप - हत्यै । त्वम् । सोम । तनूकृद्भ्य इति तनूकृत् - भ्यः । इति । आह । तनूकृदिति तनू - कृत् । हि । एषः । द्वेषोभ्य इति द्वेषः - भ्यः । अन्यकृतेभ्य इत्यन्य - कृतेभ्यः । इति । आह । अन्यकृतानीत्यन्य - कृतानि । हि । रक्षाꣳसि । उरु । यन्ता । असि । वरूथम् । इति । आह । उरु । नः । कृधि । इति । वाव । एतत् । आह । जुषाणः । अप्तुः । आज्यस्य । वेतु । इति । आह । अप्तुम् । एव । यजमानम् । कृत्वा । सुवर्गमिति सुवः - गम् । लोकम् । गमयति । रक्षसाम् । अनुपलाभायेत्यनुप - लाभाय । एति । सोमम् । ददते । **8 (50)**

**TS 6.3.2.3**

आ ग्राव्.ण्ण आ वायव्यान्या द्रोणकलशमुत् पत्नीमा नयन्त्यन्वनाꣳसि प्र वर्तयन्ति यावदेवास्यास्ति तेन सह सुवर्गं ँल्लोकमेति

नयवत्यर्चा ऽऽग्नीद्ध्रे जुहोति सुवर्गस्य लोकस्याभिनीत्यै ग्राव्.ण्णो

वायव्यानि द्रोणकलशमाग्नीद्ध्र उप वासयति वि ह्येनं तैर्गृह्णते यथ्

सहोपवासयेदपुवायेत सौम्यर्चा प्र पादयति स्वयै– [ ] 9

**<u>TS 6.3.2.3 - Padam</u>**

एति । ग्राव्.ण्णः । एति । वायव्यानि । एति । द्रोणकलशमिति

द्रोण – कलशम् । उदिति । पत्नीम् । एति । नयन्ति । अन्विति ।

अनाऽ॑सि । प्रेति । वर्तयन्ति । यावत् । एव । अस्य । अस्ति । तेन ।

सह । सुवर्गमिति सुवः – गम् । लोकम् । एति । नयवत्येति

नय – वत्या । ऋचा । आग्नीद्ध्र इत्याग्नि – इद्ध्रे । जुहोति ।

सुवर्गस्येति सुवः – गस्य । लोकस्य । अभिनीत्या इत्यभि–नीत्यै ।

ग्राव्.ण्णः । वायव्यानि । द्रोणकलशमिति द्रोण–कलशम् । आग्नीद्ध्र

इत्याग्नि – इद्ध्रे । उपेति । वासयति । वीति । हि । एनम् । तैः ।

गृह्णते । यत् । सह । उपवासयेदित्युप – वासयेत् । अपुवायेत ।

सौम्या । ऋचा । प्रेति । पादयति । स्वया । **9 (50)**

**TS 6.3.2.4**

–वैनं देवतया प्र पादयत्यदित्याः सदोऽस्यदित्याः सद आ सीदेत्याह यथायजुरेवैतद्–यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सं प्र यच्छत्येतत् त्वꣳ सोम देवो देवानुपागा इत्याह देवो ह्येष सन्– [ ] **10**

**TS 6.3.2.4 - Padam**

एव । एनम् । देवतया । प्रेति । पादयति । अदित्याः । सदः । असि । अदित्याः । सदः । एति । सीद । इति । आह । यथायजुरिति यथा–यजुः । एव । एतत् । यजमानः । वै । एतस्य । पुरा । गोप्ता । भवति । एषः । वः । देव । सवितः । सोमः । इति । आह । सवितृप्रसूत इति सवितृ–प्रसूतः । एव । एनम् । देवताभ्यः । सम् । प्रेति । यच्छति । एतत् । त्वम् । सोम । देवः । देवान् । उपेति । अगाः । इति । आह । देवः । हि । एषः । सन्न् । **10 (50)**

**TS 6.3.2.5**

देवानुपैतीदमहं मनुष्यो मनुष्यानित्याह मनुष्यो(**1**) ह्येष सन् मनुष्यानुपैति यदेतद् यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्याथ्

सह प्रजया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं

ँल्लोकमुपावर्तते नमो देवेभ्य इत्याह नमस्कारो हि देवाना॑

स्वधा पितृभ्य इत्याह स्वधाकारो हि– [ ] **11**

**TS 6.3.2.5 - Padam**

देवान् । उपैतीत्युप – एति । इदम् । अहम् । मनुष्यः । मनुष्यान् ।

इति । आह । मनुष्यः । हि । एषः । सन्न् । मनुष्यान् ।

उपैतीत्युप – एति । यत् । एतत् । यजुः । न । ब्रूयात् ।

अप्रजा इत्यप्र – जाः । अपशुः । यजमानः । स्यात् । सह ।

प्रजयेति प्र – जया । सह । रायः । पोषेण । इति । आह ।

प्रजयेति प्र – जया । एव । पशुभिरिति पशु–भिः । सह । इमम् ।

लोकम् । उपावर्तत इत्युप – आवर्तते । नमः । देवेभ्यः । इति ।

आह । नमस्कार इति नमः – कारः । हि । देवानाम् ।

स्वधेति स्व – धा । पितृभ्य इति पितृ – भ्यः । इति । आह ।

स्वधाकार इति स्वधा – कारः । हि । **11 (50)**

**TS 6.3.2.6**

पितृणामिदमहं निर्वरुणस्य पाशादित्याह वरुणपाशादेव निर्मुच्यते

ऽग्ने व्रतपत आत्मनः पूर्वा तनूरादेयेत्याहुः को हि तद्–वेद यद्

वसीयान्थ् स्वे वशे भूते पुनर्वा ददाति न वेति ग्रावाणो वै सोमस्य

राज्ञो मलिम्लुसेना य एवं ँविद्वान् ग्राव्.ण्ण आग्नीद्ध्र उपवासयति

नैनं मलिम्लुसेना विन्दति ( ) ॥ **12**

**TS 6.3.2.6 - Padam**

पितृणाम् । इदम् । अहम् । निरिति । वरुणस्य । पाशात् । इति ।

आह । वरुणपाशादिति वरुण – पाशात् । एव । निरिति । मुच्यते ।

अग्ने । व्रतपत इति व्रत – पते । आत्मनः । पूर्वा । तनूः ।

आदेयेत्या – देया । इति । आहुः । कः । हि । तत् । वेद । यत् ।

वसीयान् । स्वे । वशे । भूते । पुनः । वा । ददाति । न । वा । इति ।

ग्रावाणः । वै । सोमस्य । राज्ञः । मलिम्लुसेनेति मलिम्लु – सेना ।

यः । एवम् । विद्वान् । ग्राव्.ण्णः । आग्नीद्ध्र इत्याग्नि – इद्ध्रे ।

उपवासयतीत्युप – वासयति । न । एनम् । मलिम्लुसेनेति

मलिम्लु – सेना । विन्दति ( ) ॥ **12 (50)** *(अथ – ददते – स्वया – सन्थ् – स्वधाकारो हि – विन्दति) (A2)*

**TS 6.3.3.1**

वैष्णव्यर्चा हुत्वा यूपमच्छैति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया ऽच्छैत्यत्यन्यानगां नान्या–नुपागामित्याहाति ह्यन्यानेति नान्या–नुपैत्यर्वाक् त्वा परैरविदं परो ऽवरैरित्याहार्वाग्घ्येनं परैर्विन्दति परो ऽवरैस्तं त्वा जुषे– [ ] **13**

**TS 6.3.3.1 - Padam**

वैष्णव्या । ऋचा । हुत्वा । यूपम् । अच्छ । एति । वैष्णवः । वै ।

देवतया । यूपः । स्वया । एव । एनम् । देवतया । अच्छ । एति ।

अतीति । अन्यान् । अगाम् । न । अन्यान् । उपेति । अगाम् । इति ।

आह । अतीति । हि । अन्यान् । एति । न । अन्यान् ।

उपैतीत्युप–एति । अर्वाक् । त्वा । परैः । अविदम् । परः । अवरैः ।

इति । आह । अर्वाक् । हि । एनम् । परैः । विन्दति । परः ।

अवरैः । तम् । त्वा । जुषे । **13 (50)**

**TS 6.3.3.2**

वैष्णवं देवयज्याया इत्याह देवयज्यायै ह्येनं जुषते देवस्त्वा सविता मद्ध्वा ऽनक्त्वित्याह तेजसैवैन-मनक्त्योषधे त्रायस्वैन७ स्वधिते मैन७ं हि७ंसीरित्याह वज्रो वै स्वधितिः शान्त्यै स्वधितेर्वृक्षस्य बिभ्यतः प्रथमेन शकलेन सह तेजः परा पतति यः प्रथमः शकलः परापतेत् तमप्या हरेथ् सतेजस- [ ] **14**

**TS 6.3.3.2 - Padam**

वैष्णवम् । देवयज्याया इति देव - यज्यायै । इति । आह ।
देवयज्याया इति देव-यज्यायै । हि । एनम् । जुषते । देवः । त्वा ।
सविता । मद्ध्वा । अनक्तु । इति । आह । तेजसा । एव । एनम् ।
अनक्ति । ओषधे । त्रायस्व । एनम् । स्वधित इति स्व-धिते । मा ।
एनम् । हि७ंसीः । इति । आह । वज्रः । वै । स्वधितिरिति
स्व - धितिः । शान्त्यै । स्वधितेरिति स्व - धितेः । वृक्षस्य ।
बिभ्यतः । प्रथमेन । शकलेन । सह । तेजः । परेति । पतति । यः ।

प्रथमः । शकलः । परापतेदिति परा – पतेत् । तम् । अपि । एति ।
हरेत् । सतेजसमिति स – तेजसम् । **14 (50)**

**TS 6.3.3.3**

–मेवैनमा हरतीमे वै लोका यूपात् प्रयतो बिभ्यति दिवमग्रेण मा
लेखीरन्तरिक्षं मद्ध्येन मा हि॒ꣳसीरित्याहैभ्य एवैनं ँल्लोकेभ्यः
शमयति वनस्पते शतवल्.शो वि रोहेत्याव्रश्चने जुहोति तस्मा–
दाव्रश्चनाद्–वृक्षाणां भूया॒ꣳस उत् तिष्ठन्ति सहस्रवल्.शा वि वय॒ꣳ
रुहेमेत्याहा ऽऽशिषमेवैतामा शास्ते ऽनक्षसङ्गं– [ ] **15**

**TS 6.3.3.3 - Padam**

एव । एनम् । एति । हरति । इमे । वै । लोकाः । यूपात् । प्रयत इति
प्र – यतः । बिभ्यति । दिवम् । अग्रेण । मा । लेखीः । अन्तरिक्षम् ।
मद्ध्येन । मा । हि॒ꣳसीः । इति । आह । एभ्यः । एव । एनम् ।
लोकेभ्यः । शमयति । वनस्पते । शतवल्.श इति शत – वल्.शः ।
वीति । रोह । इति । आव्रश्चन इत्या – व्रश्चने । जुहोति । तस्मात् ।
आव्रश्चनादित्या – व्रश्चनात् । वृक्षाणाम् । भूया॒ꣳसः । उदिति ।
तिष्ठन्ति । सहस्रवल्.शा इति सहस्र – वल्.शाः । वीति । वयम् ।

रुहेम । इति । आह । आशिषमित्या–शिषम् । एव । एताम् । एति ।
शास्ते । अनक्षसङ्गमित्यनक्ष – सङ्गम् । **15 (50)**

**TS 6.3.3.4**

वृँश्चेद्–यदक्षसङ्गं वृँश्चेदधईषं यँजमानस्य प्रमायुक७ स्याद्–यं
कामयेताप्रतिष्ठितः स्यादित्यारोहं तस्मै वृश्चेदेष वै वनस्पतीना–
मप्रतिष्ठितोऽप्रतिष्ठित एव भवति यं कामयेतापशुः स्यादित्यपर्णं तस्मै
शुष्काग्रं वृँश्चेदेष वै वनस्पतीना–मपशव्यो ऽपशुरेव भवति यं कामयेत
पशुमान्थ् स्यादिति बहुपर्णं तस्मै बहुशाखं वृँश्चेदेष वै– [ ] **16**

**TS 6.3.3.4 - Padam**

वृश्चेत् । यत् । अक्षसङ्गमित्यक्ष – सङ्गम् । वृश्चेत् ।
अधईषमित्यधः – ईषम् । यजमानस्य । प्रमायुकमिति प्र–मायुकम् ।
स्यात् । यम् । कामयेत । अप्रतिष्ठित इत्यप्रति – स्थितः । स्यात् ।
इति । आरोहमित्या – रोहम् । तस्मै । वृश्चेत् । एषः । वै ।
वनस्पतीनाम् । अप्रतिष्ठित इत्यप्रति – स्थितः ।
अप्रतिष्ठित इत्यप्रति – स्थितः । एव । भवति । यम् । कामयेत ।

अपशुः । स्यात् । इति । अपर्णम् । तस्मै ।

शुष्काग्रमिति शुष्क – अग्रम् । वृश्चेत् । एषः । वै । वनस्पतीनाम् ।

अपशव्यः । अपशुः । एव । भवति । यम् । कामयेत । पशुमानिति

पशु – मान् । स्यात् । इति । बहुपर्णमिति बहु – पर्णम् । तस्मै ।

बहुशाखमिति बहु – शाखम् । वृश्चेत् । एषः । वै । **16 (50)**

**TS 6.3.3.5**

वनस्पतीनां पशव्यः पशुमानेव भवति प्रतिष्ठितं वृश्चेत्

प्रतिष्ठाकामस्यैष वै वनस्पतीनां प्रतिष्ठितो यः समे भूम्यै

स्वाद्–योने रूढः प्रत्येव तिष्ठति यः प्रत्यङ्ङुपनतस्तं वृश्चेथ् स हि

मेधमभ्युपनतः पञ्चारत्निं तस्मै वृश्चेद्–यं कामयेतोपैनमुत्तरो यज्ञो

नमेदिति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञ उपैनमुत्तरो यज्ञो– [ ] **17**

**TS 6.3.3.5 - Padam**

वनस्पतीनाम् । पशव्यः । पशुमानिति पशु – मान् । एव । भवति ।

प्रतिष्ठितमिति प्रति – स्थितम् । वृश्चेत् । प्रतिष्ठाकामस्येति

प्रतिष्ठा– कामस्य । एषः । वै । वनस्पतीनाम् । प्रतिष्ठित इति

प्रति – स्थितः । यः । समे । भूम्यै । स्वात् । योनेः । रूढः ।

प्रतीति । एव । तिष्ठति । यः । प्रत्यङ्ङ् । उपनत इत्युप–नतः । तम् ।

वृश्चेत् । सः । हि । मेधम् । अभीति । उपनत इत्युप – नतः ।

पञ्चारत्निमिति पञ्च– अरत्निम् । तस्मै । वृश्चेत् । यम् । कामयेत ।

उपेति । एनम् । उत्तर इत्युत् – तरः । यज्ञः । नमेत् । इति ।

पञ्चाक्षरेति पञ्च–अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । उपेति ।

एनम् । उत्तर इत्युत् – तरः । यज्ञः । **17 (50)**

**TS 6.3.3.6**

नमति षडरत्निं प्रतिष्ठाकामस्य षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठति

सप्तारत्निं पशुकामस्य सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव

रुन्धे नवारत्निं तेजस्कामस्य त्रिवृता स्तोमेन सम्मितं तेज स्त्रिवृत्

तेजस्व्येव भव–त्येकादशारत्नि–मिन्द्रियकाम–स्यैकादशाक्षरा

त्रिष्टुगिन्द्रियं त्रिष्टुगिन्द्रियाव्येव भवति पञ्चदशारत्निं भ्रातृव्यवतः

पञ्चदशो वज्रो भ्रातृव्याभिभूत्यै सप्तदशारत्निं प्रजाकामस्य सप्तदशः

प्रजापतिः प्रजापतेराप्त्या ( ) एकवि॒ꣳशत्यरत्निं प्रतिष्ठाकाम–

स्यैकवि॒ꣳशः स्तोमानां प्रतिष्ठा प्रतिष्ठित्या अष्टाश्रिर्भव–त्यष्टाक्षरा

गायत्री तेजो गायत्री गायत्री यज्ञमुखं तेजसैव गायत्रिया यज्ञमुखेन सम्मितः ॥ 18

**TS 6.3.3.6 - Padam**

नमति । षडरत्निमिति षट् – अरत्निम् । प्रतिष्ठाकामस्येति प्रतिष्ठा– कामस्य । षट् । वै । ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठति । सप्तारत्निमिति सप्त – अरत्निम् । पशुकामस्येति पशु – कामस्य । सप्तपदेति सप्त–पदा । शक्वरी । पशवः । शक्वरी । पशून् । एव । अवेति । रुन्धे । नवारत्निमिति नव – अरत्निम् । तेजस्कामस्येति तेजः – कामस्य । त्रिवृतेति त्रि – वृता । स्तोमेन । सम्मितमिति सं – मितम् । तेजः । त्रिवृदिति त्रि – वृत् । तेजस्वी । एव । भवति । एकादशारत्निमित्येकादश–अरत्निम् । इन्द्रियकामस्येतीन्द्रिय–कामस्य । एकादशाक्षरेत्येकादश – अक्षरा । त्रिष्टुक् । इन्द्रियम् । त्रिष्टुक् । इन्द्रियावी । एव । भवति ।

पञ्चदशारत्निमिति पञ्चदश – अरत्निम् । भ्रातृव्यवत इति

भ्रातृव्य – वतः । पञ्चदश इति पञ्च – दशः । वज्रः ।

भ्रातृव्याभिभूत्या इति भ्रातृव्य – अभिभूत्यै ।

सप्तदशारत्निमिति सप्तदश – अरत्निम् ।

प्रजाकामस्येति प्रजा – कामस्य । सप्तदश इति सप्त – दशः ।

प्रजापतिरिति प्रजा–पतिः । प्रजापतेरिति प्रजा – पतेः । आप्त्यै ( ) ।

एकवि॒ꣳशत्यरत्निमित्येकवि॒ꣳशति – अरत्निम् । प्रतिष्ठाकामस्येति

प्रतिष्ठा – कामस्य । एकवि॒ꣳश इत्येक – वि॒ꣳशः । स्तोमानाम् ।

प्रतिष्ठेति प्रति – स्था । प्रतिष्ठित्या इति प्रति – स्थित्यै ।

अष्टाश्रिरित्यष्टा – अश्रिः । भवति । अष्टाक्षरेत्यष्टा – अक्षरा ।

गायत्री । तेजः । गायत्री । गायत्री । यज्ञमुखमिति यज्ञ – मुखम् ।

तेजसा । एव । गायत्रिया । यज्ञमुखेनेति यज्ञ – मुखेन ।

सम्मित इति सं – मितः ॥ **18 (69)** *(जुषे–सतेजस–मनक्षसङ्गं – बहुशाखं वँृश्चेदेष वै–यज्ञ उपैनमुत्तरो यज्ञ–आप्त्या–एकान्नवि॒ꣳशतिश्च)* *(A3)*

**TS 6.3.4.1**

पृथिव्यै त्वा ऽन्तरिक्षाय त्वा दिवे त्वेत्याहैभ्य एवैनं ँल्लोकेभ्यः प्रोक्षति पराञ्चं प्रोक्षति पराङिव हि सुवर्गो लोकः क्रूरमिव वा एतत् करोति यत् खनत्यपो ऽव नयति शान्त्यै यवमतीरव नयत्यूर्ग्वै यवो यजमानेन यूपः सम्मितो यावानेव यजमान–स्तावती–मेवास्मि–न्नूर्जं दधाति– [ ] 19

**TS 6.3.4.1 - Padam**

पृथिव्यै । त्वा । अन्तरिक्षाय । त्वा । दिवे । त्वा । इति । आह । एभ्यः । एव । एनम् । लोकेभ्यः । प्रेति । उक्षति । पराञ्चम् । प्रेति । उक्षति । पराङ् । इव । हि । सुवर्ग इति सुवः–गः । लोकः । क्रूरम् । इव । वै । एतत् । करोति । यत् । खनति । अपः । अवेति । नयति । शान्त्यै । यवमतीरिति यव–मतीः । अवेति । नयति । ऊर्क् । वै । यवः । यजमानेन । यूपः । सम्मित इति सं – मितः । यावान् । एव । यजमानः । तावतीम् । एव । अस्मिन्न् । ऊर्जम् । दधाति । 19 (50)

**TS 6.3.4.2**

पितृणाꣳ सदनमसीति बर्.हिरव स्तृणाति पितृदेवत्या(1)ꣳ

ह्येतद्–यन्निखातं ँयद्–बर्.हिरनवस्तीर्य मिनुयात् पितृदेवत्यो निखातः

स्याद् बर्.हिरवस्तीर्य मिनोत्यस्यामेवैनं मिनोति यूपशकलमवास्यति

सतेजसमेवैनं मिनोति देवस्त्वा सविता मद्ध्वा ऽनक्त्वित्याह

तेजसैवैनमनक्ति सुपिप्पलाभ्य–स्त्वौषधीभ्य इति चषालं

प्रति– [ ] 20

**TS 6.3.4.2 - Padam**

पितृणाम् । सदनम् । असि । इति । बर्.हिः । अवेति । स्तृणाति ।

पितृदेवत्यमिति पितृ – देवत्यम् । हि । एतत् । यत् । निखातमिति

नि – खातम् । यत् । बर्.हिः । अनवस्तीर्येत्यनव – स्तीर्य ।

मिनुयात् । पितृदेवत्य इति पितृ–देवत्यः । निखात इति नि–खातः ।

स्यात् । बर्.हिः । अवस्तीर्येत्यव – स्तीर्य । मिनोति । अस्याम् ।

एव । एनम् । मिनोति । यूपशकलमिति यूप – शकलम् । अवेति ।

अस्यति । सतेजसमिति स – तेजसम् । एव । एनम् । मिनोति ।

देवः । त्वा । सविता । मद्ध्वा । अनक्तु । इति । आह । तेजसा ।
एव । एनम् । अनक्ति । सुपिप्पलाभ्य इति सु–पिप्पलाभ्यः । त्वा ।
ओषधीभ्य इत्योषधि – भ्यः । इति । चषालम् । प्रतीति । **20 (50)**

**TS 6.3.4.3**

मुञ्चति तस्माच्छीर्.षत ओषधयः फलं गृह्णन्त्यनक्ति तेजो
वा आज्यं ँयजमानेनाग्निष्ठा ऽश्रिः सम्मिता यदग्निष्ठा–मश्रिमनक्ति
यजमानमेव तेजसा ऽनक्त्यान्त–मनक्त्यान्तमेव यजमानं तेजसा
ऽनक्ति सर्वतः परि मृशत्यपरिवर्ग–मेवास्मिन् तेजो दधात्युद् दिव(ग्ग्)
स्तभाना ऽन्तरिक्षं पृणेत्याहैषां ँलोकानां ँविधृत्यै वैष्णव्यर्चा– [ ] **21**

**TS 6.3.4.3 - Padam**

मुञ्चति । तस्मात् । शीर्.षतः । ओषधयः । फलम् ।
गृह्णन्ति । अनक्ति । तेजः । वै । आज्यम् । यजमानेन ।
अग्निष्ठेत्यग्नि–स्था । अश्रिः । सम्मितेति सं – मिता । यत् ।
अग्निष्ठामित्यग्नि– स्थाम् । अश्रिम् । अनक्ति । यजमानम् ।
एव । तेजसा । अनक्ति । आन्तमित्या – अन्तम् । अनक्ति ।
आन्तमित्या – अन्तम् । एव । यजमानम् । तेजसा । अनक्ति ।

सर्वतः । परीति । मृशति । अपरिवर्गमित्यपरि – वर्गम् । एव ।
अस्मिन्न् । तेजः । दधाति । उदिति । दिवम् । स्तभान । एति ।
अन्तरिक्षम् । पृण । इति । आह । एषाम् । लोकानाम् ।
विधृत्या इति वि – धृत्यै । वैष्णव्या । ऋचा । **21 (50)**

**TS 6.3.4.4**

कल्पयति वैष्णवो वै देवतया यूपः स्वयैवैनं देवतया कल्पयति द्वाभ्यां कल्पयति द्विपाद् यजमानः प्रतिष्ठित्यै यं कामयेत तेजसैनं देवताभिरिन्द्रियेण व्यर्द्धयेय–मित्यग्निष्ठां तस्याश्रि–माहवनीयादित्थं ँवेत्थं ँवा ऽति नावयेत् तेजसैवैनं देवताभिरिन्द्रियेण व्यर्द्धयति यं कामयेत तेजसैनं देवताभिरिन्द्रियेण समर्द्धयेयमित्य– [ ] **22**

**TS 6.3.4.4 - Padam**

कल्पयति । वैष्णवः । वै । देवतया । यूपः । स्वया । एव । एनम् ।
देवतया । कल्पयति । द्वाभ्याम् । कल्पयति । द्विपादिति द्वि – पात् ।
यजमानः । प्रतिष्ठित्या इति प्रति – स्थित्यै । यम् । कामयेत ।
तेजसा । एनम् । देवताभिः । इन्द्रियेण । वीति । अर्द्धयेयम् । इति ।

अग्निष्ठामित्यग्नि – स्थाम् । तस्य । अश्रिम् ।
आहवनीयादित्या–हवनीयात् । इत्थम् । वा । इत्थम् । वा । अतीति ।
नावयेत् । तेजसा । एव । एनम् । देवताभिः । इन्द्रियेण । वीति ।
अर्द्धयति । यम् । कामयेत । तेजसा । एनम् । देवताभिः ।
इन्द्रियेण । समिति । अर्द्धयेयम् । इति । **22 (50)**

**TS 6.3.4.5**

–ग्निष्ठां तस्याश्रिमाहवनीयेन सं मिनुयात् तेजसैवैनं देवताभिरिन्द्रियेण समर्द्धयति ब्रह्मवनिं त्वा क्षत्रवनिमित्याह यथायजुरेवैतत् परि व्ययत्यूर्ग्वै रशना यजमानेन यूपः सम्मितो यजमानमेवोर्जा समर्द्धयति नाभिदघ्ने परि व्ययति नाभिदघ्न एवास्मा ऊर्जं दधाति तस्मान्नाभिदघ्न ऊर्जा भुञ्जते यं कामयेतोर्जैनं– [ ] **23**

**TS 6.3.4.5 - Padam**

अग्निष्ठामित्यग्नि – स्थाम् । तस्य । अश्रिम् ।
आहवनीयेनेत्या – हवनीयेन । समिति । मिनुयात् । तेजसा । एव ।
एनम् । देवताभिः । इन्द्रियेण । समिति । अर्द्धयति । ब्रह्मवनिमिति
ब्रह्म – वनिम् । त्वा । क्षत्रवनिमिति क्षत्र–वनिम् । इति । आह ।

यथायजुरिति यथा–यजुः । एव । एतत् । परीति । व्ययति । ऊर्क् ।

वै । रशना । यजमानेन । यूपः । सम्मित इति सं–मितः ।

यजमानम् । एव । ऊर्जा । समिति । अर्द्धयति । नाभिदघ्न इति

नाभि – दघ्ने । परीति । व्ययति । नाभिदघ्न इति नाभि – दघ्ने ।

एव । अस्मै । ऊर्जम् । दधाति । तस्मात् ।

नाभिदघ्न इति नाभि – दघ्ने । ऊर्जा । भुञ्जते । यम् । कामयेत ।

ऊर्जा । एनम् । **23 (50)**

**TS 6.3.4.6**

व्यर्द्धयेय–मित्यूर्द्ध्वां वा तस्यावाचीं वा ऽवोहेदूर्जैवैनं व्यर्द्धयति

यदि कामयेत वर्.षुकः पर्जन्यः स्यादित्य–वाचीमवोहेद् वृष्टिमेव

नि यच्छति यदि कामयेतावर्.षुकः स्यादित्यूर्द्ध्वामुदूहेद् वृष्टिमेवोद्

यच्छति पितृणां निखातं मनुष्याणामूर्द्ध्वं निखातादा रशनाया

ओषधीनाᳪ् रशना विश्वेषां– [ ] **24**

**TS 6.3.4.6 - Padam**

वीति । अर्द्धयेयम् । इति । ऊर्द्ध्वाम् । वा । तस्य । अवाचीम् ।
वा । अवेति । ऊहेत् । ऊर्जा । एव । एनम् । वीति । अर्द्धयति ।
यदि । कामयेत । वर्.षुकः । पर्जन्यः । स्यात् । इति । अवाचीम् ।
अवेति । ऊहेत् । वृष्टिम् । एव । नीति । यच्छति । यदि । कामयेत ।
अवर्.षुकः । स्यात् । इति । ऊर्द्ध्वाम् । उदिति । ऊहेत् । वृष्टिम् ।
एव । उदिति । यच्छति । पितृणाम् । निखातमिति नि – खातम् ।
मनुष्याणाम् । ऊर्द्ध्वम् । निखातादिति नि – खातात् । एति ।
रशनायाः । ओषधीनाम् । रशना । विश्वेषां । **24 (50)**

**TS 6.3.4.7**

देवानामूर्द्ध्व॒ꣳ रशनाया आ चषालादिन्द्रस्य चषाल॒ꣳ
साद्ध्यानामतिरिक्त॒ꣳ स वा एष सर्वदेवत्यो यद्–यूपो यद्–यूपं मिनोति
सर्वा एव देवताः प्रीणाति यज्ञेन वै देवाः सुवर्गं ँल्लोकमायन्
ते ऽमन्यन्त मनुष्या नो ऽन्वाभविष्यन्तीति ते यूपेन योपयित्वा सुवर्गं
ँल्लोकमायन् तमृषयो यूपेनैवानु प्राजानन् तद् यूपस्य यूपत्वं– [ ] **25**

**TS 6.3.4.7 - Padam**

देवानाम् । ऊर्द्ध्वम् । रशनायाः । एति । चषालात् । इन्द्रस्य ।

चषालम् । साद्ध्यानाम् । अतिरिक्तमित्यति – रिक्तम् । सः ।

वै । एषः । सर्वदेवत्य इति सर्व–देवत्यः । यत् । यूपः । यत् ।

यूपम् । मिनोति । सर्वाः । एव । देवताः । प्रीणाति । यज्ञेन । वै ।

देवाः । सुवर्गमिति सुवः–गम् । लोकम् । आयन्न् । ते । अमन्यन्त ।

मनुष्याः । नः । अन्वाभविष्यन्तीत्यनु–आभविष्यन्ति । इति । ते ।

यूपेन । योपयित्वा । सुवर्गमिति सुवः–गम् । लोकम् । आयन्न् ।

तम् । ऋषयः । यूपेन । एव । अनु । प्रेति । अजानन्न् । तत् ।

यूपस्य । यूपत्वमिति यूप– त्वम् । **25 (50)**

**TS 6.3.4.8**

यँद् यूपं मिनोति सुवर्गस्य लोकस्य प्रज्ञात्यै पुरस्तान् मिनोति

पुरस्ताद्धि यज्ञस्य प्रज्ञायते ऽप्रज्ञात९ं हि तद् यदतिपन्न आहुरिदं

कार्यमासीदिति साद्ध्या वै देवा यज्ञमत्यमन्यन्त तान्. यज्ञो नास्पृशत्

तान्. यद् यज्ञस्यातिरिक्तमासीत् तदस्पृशदतिरिक्तं ँवा एतद् यज्ञस्य यदग्नावग्निं मथित्वा प्रहरत्यतिरिक्तमेतद् – [ ] 26

**TS 6.3.4.8 - Padam**

यत् । यूपम् । मिनोति । सुवर्गस्येति सुवः – गस्य । लोकस्य । प्रज्ञात्या इति प्र – ज्ञात्यै । पुरस्तात् । मिनोति । पुरस्तात् । हि । यज्ञस्य । प्रज्ञायत इति प्र – ज्ञायते । अप्रज्ञातमित्यप्र – ज्ञातम् । हि । तत् । यत् । अतिपन्न इत्यति – पन्ने । आहुः । इदम् । कार्यम् । आसीत् । इति । साद्ध्याः । वै । देवाः । यज्ञम् । अतीति । अमन्यन्त । तान् । यज्ञः । न । अस्पृशत् । तान् । यत् । यज्ञस्य । अतिरिक्तमित्यति – रिक्तम् । आसीत् । तत् । अस्पृशत् । अतिरिक्तमित्यति – रिक्तम् । वै । एतत् । यज्ञस्य । यत् । अग्नौ । अग्निम् । मथित्वा । प्रहरतीति प्र – हरति । अतिरिक्तमित्यति – रिक्तम् । एतत् । 26 (50)

**TS 6.3.4.9**

यूपस्य यदूर्द्ध्वं चषालात् तेषां तद् भागधेयं तानेव तेन प्रीणाति देवा वै स७स्थिते सोमे प्र स्रुचो ऽहरन् प्र यूपं ते ऽमन्यन्त यज्ञवेशसं

ँवा इदं कुर्म इति ते प्रस्तर९ स्रुचां निष्क्रयण–मपश्यन्थ् स्वरुं
ँयूपस्य स९स्थिते सोमे प्र प्रस्तर९ं हरति जुहोति
स्वरुमयज्ञवेशसाय ॥ **27**

**<u>TS 6.3.4.9 - Padam</u>**

यूपस्य । यत् । ऊर्द्ध्वम् । चषालात् । तेषाम् । तत् । भागधेयमिति
भाग – धेयम् । तान् । एव । तेन । प्रीणाति । देवाः । वै ।
स९स्थित इति सं–स्थिते । सोमे । प्रेति । स्रुचः । अहरन्न् । प्रेति ।
यूपम् । ते । अमन्यन्त । यज्ञवेशसमिति यज्ञ – वेशसम् । वै ।
इदम् । कुर्मः । इति । ते । प्रस्तरमिति प्र – स्तरम् । स्रुचाम् ।
निष्क्रयणमिति निः – क्रयणम् । अपश्यन्न् । स्वरुम् । यूपस्य ।
स९स्थित इति सं – स्थिते । सोमे । प्रेति । प्रस्तरमिति प्र–स्तरम् ।
हरति । जुहोति । स्वरुम् । अयज्ञवेशसायेत्ययज्ञ–वेशसाय ॥ **27 (42)**

*(दधाति – प्रत्यृ – चा – समर्द्धयेयमित्यू – जैनं – ँविश्वेषां – ँयूपत्व – मतिरिक्तमेतद् – द्विचत्वारि९शच्च) (A4)*

**TS 6.3.5.1**

साद्ध्या वै देवा अस्मिँल्लोक आसन् नान्यत् किं चन मिषत्

ते ऽग्निमेवाग्नये मेधाया ऽलभन्त न ह्यन्यदालंभ्य-मविन्दन्

ततो वा इमाः प्रजाः प्राजायन्त यदग्नावग्निं मथित्वा प्रहरति

प्रजानां प्रजननाय रुद्रो वा एष यदग्निर्यजमानः पशुर्यत्

पशुमालभ्याग्निं मन्थेद् रुद्राय यजमान- [ ] **28**

**TS 6.3.5.1 - Padam**

साद्ध्याः । वै । देवाः । अस्मिन्न् । लोके । आसन्न् । न । अन्यत् ।

किम् । चन । मिषत् । ते । अग्निम् । एव । अग्नये । मेधाय । एति ।

अलभन्त । न । हि । अन्यत् । आलंभ्यमित्या-लंभ्यम् । अविन्दन्न् ।

ततः । वै । इमाः । प्रजा इति प्र - जाः । प्रेति । अजायन्त । यत् ।

अग्नौ । अग्निम् । मथित्वा । प्रहरतीति प्र - हरति । प्रजानामिति

प्र - जानाम् । प्रजननायेति प्र-जननाय । रुद्रः । वै । एषः । यत् ।

अग्निः । यजमानः । पशुः । यत् । पशुम् । आलभ्येत्या - लभ्य ।

अग्निम् । मन्थेत् । रुद्राय । यजमानम् । **28 (50)**

**TS 6.3.5.2**

–मपि दद्ध्यात् प्रमायुकः स्यादथो खल्वाहुरग्निः सर्वा देवता

हविरेतद्–यत् पशुरिति यत् पशुमालभ्याग्निं मन्थति

हव्यायैवाऽऽसन्नाय सर्वा देवता जनय–त्युपाकृत्यैव मन्थ्य–

स्तन्नेवाऽऽलब्धं नेवानालब्ध–मग्ने–र्जनित्र–मसीत्याहाग्नेर्ह्येत–ज्जनित्रं

ँवृषणौ स्थ इत्याह वृषणौ– [ ] **29**

**TS 6.3.5.2 - Padam**

अपीति । दद्ध्यात् । प्रमायुक इति प्र–मायुकः । स्यात् । अथो इति ।

खलु । आहुः । अग्निः । सर्वाः । देवताः । हविः । एतत् । यत् ।

पशुः । इति । यत् । पशुम् । आलभ्येत्या–लभ्य । अग्निम् । मन्थति ।

हव्याय । एव । आसन्नायेत्या–सन्नाय । सर्वाः । देवताः । जनयति ।

उपाकृत्येत्युप – आकृत्य । एव । मन्थ्यः । तत् । न । इव ।

आलब्धमित्या – लब्धम् । न । इव । अनालब्धमित्यना – लब्धम् ।

अग्नेः । जनित्रम् । असि । इति । आह । अग्नेः । हि । एतत् ।

जनित्रम् । वृषणौ । स्थः । इति । आह । वृषणौ । **29 (50)**

**TS 6.3.5.3**

ह्येता–वुर्वश्यस्यायु–रसीत्याह मिथुनत्वाय घृतेनाक्ते वृषणं

दधाथामित्याह वृषण७ ह्येते दधाते ये अग्निं गायत्रं छन्दो ऽनु

प्र जायस्वेत्याह छन्दोभिरेवैनं प्र जनयत्यग्नये मथ्यमानायानु

ब्रूहीत्याह सावित्रीमृचमन्वाह सवितृप्रसूत एवैनं मन्थति जातायानु

ब्रूहि– [ ] **30**

**TS 6.3.5.3 - Padam**

हि । एतौ । उर्वशी । असि । आयुः । असि । इति । आह ।

मिथुनत्वायेति मिथुन – त्वाय । घृतेन । अक्ते इति । वृषणम् ।

दधाथाम् । इति । आह । वृषणम् । हि । एते इति । दधाते इति ।

ये इति । अग्निम् । गायत्रम् । छन्दः । अनु । प्रेति । जायस्व ।

इति । आह । छन्दोभिरिति छन्दः – भिः । एव । एनम् । प्रेति ।

जनयति । अग्नये । मथ्यमानाय । अन्विति । ब्रूहि । इति । आह ।

सावित्रीम् । ऋचम् । अन्विति । आह ।

सवितृप्रसूत इति सवितृ–प्रसूतः । एव । एनम् । मन्थति । जाताय ।

अन्विति । ब्रूहि । **30 (50)**

**TS 6.3.5.4**

प्रह्रियमाणायानु ब्रूहीत्याह काण्डेकाण्ड एवैनं क्रियमाणे समर्द्धयति गायत्रीः सर्वा अन्वाह गायत्रछन्दा वा अग्निः स्वेनैवैनं छन्दसा समर्द्धयत्यग्निः पुरा भवत्यग्निं मथित्वा प्र हरति तौ संभवन्तौ यजमानमभि सं भवतो भवतं नः समनसावित्याह शान्त्यै प्रहृत्य जुहोति जातायैवास्मा अन्नमपि ( ) दधात्याज्येन जुहोत्येतद्–वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्द्धयत्यथो तेजसा ॥ **31**

**TS 6.3.5.4 - Padam**

प्रह्रियमाणायेति प्र – ह्रियमाणाय । अन्विति । ब्रूहि । इति । आह । काण्डेकाण्ड इति काण्डे – काण्डे । एव । एनम् । क्रियमाणे । समिति । अर्द्धयति । गायत्रीः । सर्वाः । अन्विति । आह । गायत्रछन्दा इति गायत्र–छन्दाः । वै । अग्निः । स्वेन । एव । एनम् । छन्दसा । समिति । अर्द्धयति । अग्निः । पुरा । भवति । अग्निम् । मथित्वा । प्रेति । हरति । तौ । संभवन्ताविति सं – भवन्तौ ।

यजमानम् । अभि । समिति । भवतः । भवतम् । नः । समनसाविति
स - मनसौ । इति । आह । शान्त्यै । प्रहत्येति प्र-हत्य । जुहोति ।
जाताय । एव । अस्मै । अन्नम् । अपीति ( ) । दधाति । आज्येन ।
जुहोति । एतत् । वै । अग्नेः । प्रियम् । धाम । यत् । आज्यम् ।
प्रियेण । एव । एनम् । धाम्ना । समिति । अर्द्धयति । अथो इति ।
तेजसा ॥ **31 (68)**

*(यजमान-माह वृषणौ-जातायानु ब्रूह्य-प्य -ष्टादश च) (A5)*

**TS 6.3.6.1**

इषे त्वेति बर्.हिरा दत्त इच्छत इव ह्येष यो यजत उपवी-रसीत्याहोप
ह्येनानाकरोत्युपो देवान् दैवीर्विशः प्रागुरित्याह दैवीर्ह्येता विशः
सतीर्देवानुपयन्ति वह्नीरुशिज इत्याहर्त्विजो वै वह्नय उशिज-
स्तस्मादेवमाह बृहस्पते **धारया** वसूनीत्या- [ ] **32**

**TS 6.3.6.1 - Padam**

इषे । त्वा । इति । बर्.हिः । एति । दत्ते । इच्छते । इव । हि ।
एषः । यः । यजते । उपवीरित्युप - वीः । असि । इति । आह ।
उपेति । हि । एनान् । आकरोतीत्या - करोति । उपो इति । देवान् ।

दैवीः । विशः । प्रेति । अगुः । इति । आह । दैवीः । हि । एताः । विशः । सतीः । देवान् । उपयन्तीत्युप – यन्ति । वह्नीः । उशिजः । इति । आह । ऋत्विजः । वै । वह्नयः । उशिजः । तस्मात् । एवम् । आह । बृहस्पते । धारय । वसूनि । इति । **32 (50)**

**TS 6.3.6.2**

–ह ब्रह्म वै देवानां बृहस्पति र्ब्रह्मणैवास्मै पशूनव रुन्धे हव्या ते स्वदन्तामित्याह स्वदयत्येवैनान् देव त्वष्टर्वसु रण्वेत्याह त्वष्टा वै पशूनां मिथुनानाꣳ रूपकृद् रूपमेव पशुषु दधाति रेवती रमद्ध्वमित्याह पशवो वै रेवतीः पशूनेवास्मै रमयति देवस्य त्वा सवितुः प्रसव इति– [ ] **33**

**TS 6.3.6.2 - Padam**

आह । ब्रह्म । वै । देवानाम् । बृहस्पतिः । ब्रह्मणा । एव । अस्मै । पशून् । अवेति । रुन्धे । हव्या । ते । स्वदन्ताम् । इति । आह । स्वदयति । एव । एनान् । देव । त्वष्टः । वसु । रण्व । इति । आह । त्वष्टा । वै । पशूनाम् । मिथुनानाम् । रूपकृदिति रूप – कृत् ।

रूपम् । एव । पशुषु । दधाति । रेवतीः । रमद्ध्वम् । इति । आह ।
पशवः । वै । रेवतीः । पशून् । एव । अस्मै । रमयति । देवस्य ।
त्वा । सवितुः । प्रसव इति प्र – सवे । इति । **33 (50)**

**TS 6.3.6.3**

रशनामा दत्ते प्रसूत्या अश्विनोर्बाहुभ्या–मित्याहाश्विनौ हि
देवानामद्ध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्या ऋतस्य त्वा
देवहविः पाशेनाऽऽ रभ इत्याह सत्यं ँवा ऋत\ सत्येनैवैनमृतेनाऽऽ
रभते ऽक्ष्णया परि हरति वद्ध्य\ हि प्रत्यञ्चं प्रतिमुञ्चन्ति व्यावृत्त्यै
धर्.षा मानुषानिति नि युनक्ति धृत्या अद्भ्य– [ ] **34**

**TS 6.3.6.3 - Padam**

रशनाम् । एति । दत्ते । प्रसूत्या इति प्र – सूत्यै । अश्विनोः ।
बाहुभ्यामिति बाहु–भ्याम् । इति । आह । अश्विनौ । हि । देवानाम् ।
अद्ध्वर्यू इति । आस्ताम् । पूष्णः । हस्ताभ्याम् । इति । आह ।
यत्यै । ऋतस्य । त्वा । देवहविरिति देव – हविः । पाशेन । एति ।
रभे । इति । आह । सत्यम् । वै । ऋतम् । सत्येन । एव । एनम् ।
ऋतेन । एति । रभते । अक्ष्णया । परीति । हरति । वद्ध्यम् । हि ।

प्रत्यञ्चम् । प्रतिमुञ्चन्तीति प्रति - मुञ्चन्ति । व्यावृत्त्या इति वि - आवृत्त्यै । धर्.ष । मानुषान् । इति । नीति । युनक्ति । धृत्यै । अद्भ्य इत्यत् - भ्यः । **34 (50)**

**TS 6.3.6.4**

स्त्वौषधीभ्यः प्रोक्षामीत्याहाद्भ्यो ह्येष ओषधीभ्यः संभवति यत् पशुरपां पेरुरसीत्याहैष ह्यपां पाता यो मेधायाऽऽरभ्यते स्वात्तं चिथ् सदेव॑ हव्यमापो देवीः स्वदतैनमित्याह स्वदयत्येवैन-मुपरिष्टात् प्रोक्षत्युपरिष्टादेवैनं मेद्ध्यं करोति पाययत्यन्तरत एवैनं ( ) मेद्ध्यं करोत्यधस्तादुपोक्षति सर्वत एवैनं मेद्ध्यं करोति ॥ **35**

**TS 6.3.6.4 - Padam**

त्वा । ओषधीभ्य इत्योषधि - भ्यः । प्रेति । उक्षामि । इति । आह । अद्भ्य इत्यत् - भ्यः । हि । एषः । ओषधीभ्य इत्योषधि - भ्यः । संभवतीति सं - भवति । यत् । पशुः । अपाम् । पेरुः । असि ।

इति । आह । एषः । हि । अपाम् । पाता । यः । मेधाय । आरभ्यत
इत्या-रभ्यते । स्वात्तम् । चित् । सदेवमिति स - देवम् । हव्यम् ।
आपः । देवीः । स्वदत । एनम् । इति । आह । स्वदयति । एव ।
एनम् । उपरिष्टात् । प्रेति । उक्षति । उपरिष्टात् । एव । एनम् ।
मेद्ध्यम् । करोति । पाययति । अन्तरतः । एव । एनम् ( ) ।
मेद्ध्यम् । करोति । अधस्तात् । उपेति । उक्षति । सर्वतः ।
एव । एनम् । मेद्ध्यम् । करोति ॥ **35 (60)**

*(वसूनीति-प्रसव इत्य-दृभ्यो-ऽन्तरत एवैनं - दश च) (A6)*

**TS 6.3.7.1**

अग्निना वै होत्रा देवा असुरा-नभ्यभव-न्नग्नये समिद्ध्यमानायानु
ब्रूहीत्याह भ्रातृव्याभिभूत्यै सप्तदश सामिधेनी-रन्वाह सप्तदशः
प्रजापतिः प्रजापतेराप्त्यै सप्तदशान्वाह द्वादश मासाः पञ्चर्तवः
स सँवथ्सरः सँवथ्सरं प्रजा अनु प्र जायन्ते प्रजानां प्रजननाय
देवा वै सामिधेनीरनूच्य यज्ञं नान्वपश्यन्थ् स
प्रजापति-स्तूष्णीमाघार- [ ] **36**

**TS 6.3.7.1 - Padam**

अग्निना । वै । होत्रा । देवाः । असुरान् । अभीति । अभवन्न् ।
अग्नये । समिद्ध्यमानायेति सं – इद्ध्यमानाय । अन्विति । ब्रूहि ।
इति । आह । भ्रातृव्याभिभूत्या इति भ्रातृव्य–अभिभूत्यै । सप्तदशेति
सप्त – दश । सामिधेनीरिति सां – इधेनीः । अन्विति । आह ।
सप्तदश इति सप्त – दशः । प्रजापतिरिति प्रजा – पतिः ।
प्रजापतेरिति प्रजा – पतेः । आप्त्यै । सप्तदशेति सप्त – दश ।
अन्विति । आह । द्वादश । मासाः । पञ्च । ऋतवः । सः ।
सँवथ्सर इति सं – वथ्सरः । सँवथ्सरमिति सं – वथ्सरम् । प्रजा
इति प्र – जाः । अनु । प्रेति । जायन्ते । प्रजानामिति प्र–जानाम् ।
प्रजननायेति प्र–जननाय । देवाः । वै । सामिधेनीरिति सां–इधेनीः ।
अनूच्येत्यनु – उच्य । यज्ञम् । न । अन्विति । अपश्यन्न् । सः ।
प्रजापतिरिति प्रजा–पतिः । तूष्णीम् । आघारमित्या–घारम् । **36 (50)**

**TS 6.3.7.2**

–मा ऽघारयत् ततो वै देवा यज्ञमन्वपश्यन्. यत् तूष्णी–माघार–माघारयति यज्ञस्यानुख्यात्या असुरेषु वै यज्ञ आसीत् तं देवास्तूष्णीꣳहोमेनावृञ्जत यत् तूष्णी–माघार–माघारयति भ्रातृव्यस्यैव तद् यज्ञं वृँङ्क्ते परिधीन्थ् सं मार्ष्टि पुनात्येवैनान् त्रिस्त्रिः सं मार्ष्टि त्र्यावृ**द्धि** यज्ञोऽथो रक्षसामपहत्यै द्वादश सं पद्यन्ते द्वादश– [ ] **37**

**TS 6.3.7.2 - Padam**

एति । अघारयत् । ततः । वै । देवाः । यज्ञम् । अन्विति । अपश्यन्न् । यत् । तूष्णीम् । आघारमित्या – घारम् । आघारयतीत्या – घारयति । यज्ञस्य । अनुख्यात्या इत्यनु – ख्यात्यै । असुरेषु । वै । यज्ञः । आसीत् । तम् । देवाः । तूष्णीꣳहोमेनेति तूष्णीम्–होमेन । अवृञ्जत । यत् । तूष्णीम् । आघारमित्या – घारम् । आघारयतीत्या – घारयति । भ्रातृव्यस्य । एव । तत् । यज्ञम् । वृङ्क्ते । परिधीनिति परि – धीन् । समिति । मार्ष्टि । पुनाति । एव । एनान् । त्रिस्त्रिरिति त्रिः – त्रिः । समिति । मार्ष्टि । त्र्यावृदिति त्रि – आवृत् । हि । यज्ञः । अथो इति ।

रक्षसाम् । अपहत्या इत्यप – हत्यै । द्वादश । समिति । पद्यन्ते ।
द्वादश । **37 (50)**

**TS 6.3.7.3**

मासाः सँवथ्सरः सँवथ्सरमेव प्रीणात्यथो सँवथ्सरमेवास्मा
उप दधाति सुवर्गस्य लोकस्य समष्ट्यै शिरो वा एतद् यज्ञस्य
यदाघारोऽग्निः सर्वा देवता यदाघार–माघारयति शीर्.षत एव यज्ञस्य
यजमानः सर्वा देवता अव रुन्धे शिरो वा एतद् यज्ञस्य यदाघार
आत्मा पशुराघारमाघार्य पशुꣳ समनक्त्यात्मन्नेव यज्ञस्य– [ ] **38**

**TS 6.3.7.3 - Padam**

मासाः । सँवथ्सर इति सं–वथ्सरः । सँवथ्सरमिति सं–वथ्सरम् ।
एव । प्रीणाति । अथो इति । सँवथ्सरमिति सं – वथ्सरम् । एव ।
अस्मै । उपेति । दधाति । सुवर्गस्येति सुवः – गस्य । लोकस्य ।
समष्ट्या इति सं – अष्ट्यै । शिरः । वै । एतत् । यज्ञस्य । यत् ।
आघार इत्या – घारः । अग्निः । सर्वाः । देवताः । यत् ।
आघारमित्या–घारम् । आघारयतीत्या–घारयति । शीर्.षतः । एव ।

यज्ञस्य । यजमानः । सर्वाः । देवताः । अवेति । रुन्धे । शिरः । वै । एतत् । यज्ञस्य । यत् । आघार इत्या - घारः । आत्मा । पशुः । आघारमित्या - घारम् । आघार्येत्या - घार्य । पशुम् । समिति । अनक्ति । आत्मन्न् । एव । यज्ञस्य । **38 (50)**

**TS 6.3.7.4**

शिरः प्रति दधाति सं ते प्राणो वायुना गच्छतामित्याह वायुदेवत्यो वै प्राणो वायावेवास्य प्राणं जुहोति सं ँयजत्रैरङ्गानि सं ँयज्ञपतिराशिषेत्याह यज्ञपतिमेवास्याऽऽशिषं गमयति विश्वरूपो वै त्वाष्ट्र उपरिष्टात् पशुमभ्यवमीत् तस्मा-दुपरिष्टात् पशोर्नाव द्यन्ति यदुपरिष्टात् पशु७ं समनक्ति मेद्ध्यमेवै- [ ] **39**

**TS 6.3.7.4 - Padam**

शिरः । प्रतीति । दधाति । समिति । ते । प्राण इति प्र - अनः । वायुना । गच्छताम् । इति । आह । वायुदेवत्य इति वायु-देवत्यः । वै । प्राण इति प्र - अनः । वायौ । एव । अस्य । प्राणमिति प्र - अनम् । जुहोति । समिति । यजत्रैः । अङ्गानि । समिति । यज्ञपतिरिति यज्ञ - पतिः । आशिषेत्या - शिषा । इति । आह ।

यज्ञपतिमिति यज्ञ – पतिम् । एव । अस्य । आशिषमित्या–शिषम् । गमयति । विश्वरूप इति विश्व – रूपः । वै । त्वाष्ट्रः । उपरिष्टात् । पशुम् । अभीति । अवमीत् । तस्मात् । उपरिष्टात् । पशोः । न । अवेति । द्यन्ति । यत् । उपरिष्टात् । पशुम् । समनक्तीति सं – अनक्ति । मेद्ध्यम् । एव । **39 (50)**

**TS 6.3.7.5**

–नं करोत्यृत्विजो वृणीते छन्दाᳪस्येव वृणीते सप्त वृणीते सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाᳪस्युभयस्यावरुद्ध्या एकादश प्रयाजान्. यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तं प्र यजति वपामेकः परि शय आत्मैवाऽऽत्मानं परि शये वज्रो वै स्वधितिर्वज्रो यूपशकलो घृतं खलु वै ( ) देवा वज्रं कृत्वा सोममघ्नन् घृतेनाक्तौ पशुं त्रायेथामित्याह वज्रेणैवैनं ँवशे कृत्वा ऽऽ लभते ॥ **40**

**TS 6.3.7.5 - Padam**

एनम् । करोति । ऋत्विजः । वृणीते । छन्दाꣳसि । एव । वृणीते ।
सप्त । वृणीते । सप्त । ग्राम्याः । पशवः । सप्त । आरण्याः ।
सप्त । छन्दाꣳसि । उभयस्य । अवरुद्ध्या इत्यव – रुद्ध्यै ।
एकादश । प्रयाजानिति प्र – याजान् । यजति । दश । वै । पशोः ।
प्राणा इति प्र–अनाः । आत्मा । एकादशः । यावान् । एव । पशुः ।
तम् । प्रेति । यजति । वपाम् । एकः । परीति । शये । आत्मा ।
एव । आत्मानम् । परीति । शये । वज्रः । वै । स्वधितिरिति
स्व – धितिः । वज्रः । यूपशकल इति यूप – शकलः ।
घृतम् । खलु । वै ( ) । देवाः । वज्रम् । कृत्वा । सोमम् ।
अघ्नन्न् । घृतेन । अक्तौ । पशुम् । त्रायेथाम् । इति । आह ।
वज्रेण । एव । एनम् । वशे । कृत्वा । एति । लभते ॥ **40 (68)**

*(आघारं – पद्यन्ते द्वादश – त्मन्नेव यज्ञस्य – मेध्यमेव – खलु वा – अष्टादश च) (A7)*

**TS 6.3.8.1**

पर्यग्नि करोति सर्वहुतमेवैनं करोत्य–स्कन्दाया–स्कन्न९ँ हि

तद् यद् धुतस्य स्कन्दति त्रिः पर्यग्नि करोति त्र्यावृद्धि यज्ञो ऽथो

रक्षसामपहत्यै ब्रह्मवादिनो वदन्त्यन्वारभ्यः पशू(3)र्नान्वारभ्या(3)

इति मृत्यवे वा एष नीयते यत् पशुस्तं ँयदन्वारभेत प्रमायुको

यजमानः स्यादथो खल्वाहुः सुवर्गाय वा एष लोकाय

नीयते यत्– [ ] **41**

**TS 6.3.8.1 - Padam**

पर्यग्नीति परि – अग्नि । करोति । सर्वहुतमिति सर्व–हुतम् । एव ।

एनम् । करोति । अस्कन्दाय । अस्कन्नम् । हि । तत् । यत् ।

हुतस्य । स्कन्दति । त्रिः । पर्यग्नीति परि – अग्नि । करोति ।

त्र्यावृदिति त्रि – आवृत् । हि । यज्ञः । अथो इति । रक्षसाम् ।

अपहत्या इत्यप – हत्यै । ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति ।

अन्वारभ्य इत्यनु – आरभ्यः । पशू(3)ः । न । अन्वारभ्या(3)

इत्यनु –आरभ्या(3)ः । इति । मृत्यवे । वै । एषः । नीयते । यत् ।

पशुः । तम् । यत् । अन्वारभेतेत्यनु-आरभेत । प्रमायुक

इति प्र-मायुकः । यजमानः । स्यात् । अथो इति । खलु । आहुः ।

सुवर्गायेति सुवः - गाय । वै । एषः । लोकाय । नीयते ।

यत् । **41 (50)**

**TS 6.3.8.2**

पशुरिति यन्नान्वारभेत सुवर्गाल्लोकाद् यजमानो हीयेत

वपाश्रपणीभ्या-मन्वारभते तन्नेवान्वारब्धं नेवानन्वारब्धमुप

प्रेष्य होतर्. हव्या देवेभ्य इत्याहेषितꣳ हि कर्म क्रियते रेवतीर्यज्ञपतिं

प्रियधा ऽऽ विशतेत्याह यथायजुरेवैतदग्निना पुरस्तादेति रक्षसामपहत्यै

पृथिव्याः संपृचः पाहीति बर्.हि- [ ] **42**

**TS 6.3.8.2 - Padam**

पशुः । इति । यत् । न । अन्वारभेतेत्यनु - आरभेत ।

सुवर्गादिति सुवः - गात् । लोकात् । यजमानः । हीयेत ।

वपाश्रपणीभ्यामिति वपा - श्रपणीभ्याम् ।

अन्वारभत इत्यनु - आरभते । तत् । न । इव ।

अन्वारब्धमित्यनु-आरब्धम् । न । इव ।

अनन्वारब्धमित्यननु–आरब्धम् । उप । प्रेति । इष्य । होतः । हव्या । देवेभ्यः । इति । आह । इषितम् । हि । कर्म । क्रियते । रेवतीः । यज्ञपतिमिति यज्ञ – पतिम् । प्रियधेति प्रिय – धा । एति । विशत । इति । आह । यथायजुरिति यथा – यजुः । एव । एतत् । अग्निना । पुरस्तात् । एति । रक्षसाम् । अपहत्या इत्यप – हत्यै । पृथिव्याः । संपृच इति सं – पृचः । पाहि । इति । बर्.हिः । **42 (50)**

**TS 6.3.8.3**

–रुपास्यत्य–स्कन्दाया–स्कन्नꣳ हि तद् यद् बर्.हिषि स्कन्दत्यथो बर्.हिषदमेवैनं करोति पराङ वर्तते ऽद्ध्वर्युः पशोः सं.ज्ञप्यमानात् पशुभ्य एव तन्नि ह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियं प्र पशूनाप्नोति य एवं वेँद पश्चाल्लोका वा एषा प्राच्युदानीयते यत् पत्नी नमस्त आतानेत्याहाऽऽदित्यस्य वै रश्मय– [ ] **43**

**TS 6.3.8.3 - Padam**

उपेति । अस्यति । अस्कन्दाय । अस्कन्नम् । हि । तत् । यत् । बर्.हिषि । स्कन्दति । अथो इति । बर्.हिषदमिति बर्.हि – सदम् ।

एव । एनम् । करोति । पराङ् । एति । वर्तते । अद्ध्वर्युः । पशोः । संज्ञप्यमानादिति सं – ज्ञप्यमानात् । पशुभ्य इति पशु – भ्यः । एव । तत् । नीति । ह्वुते । आत्मनः । अनाव्रस्कायेत्यना–व्रस्काय । गच्छति । श्रियम् । प्रेति । पशून् । आप्नोति । यः । एवम् । वेद । पश्चाल्लोकेति पश्चात् – लोका । वै । एषा । प्राची । उदानीयत इत्युत् – आनीयते । यत् । पत्नी । नमः । ते । आतानेत्या – तान । इति । आह । आदित्यस्य । वै । रश्मयः । **43 (50)**

**TS 6.3.8.4**

आतानास्तेभ्य एव नमस्करोत्यनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै घृतस्य कुल्यामनु सह प्रजया सह रायस्पोषेणे–त्याहाऽऽशिषमेवैतामा शास्त आपो देवीः शुद्धायुव इत्याह यथायजुरेवैतत् ॥ **44**

**TS 6.3.8.4 - Padam**

आताना इत्या – तानाः । तेभ्यः । एव । नमः । करोति । अनर्वा । प्रेति । इहि । इति । आह । भ्रातृव्यः । वै । अर्वा । भ्रातृव्यापनुत्त्या

इति भ्रातृव्य – अपनुत्त्यै । घृतस्य । कुल्याम् । अन्विति । सह ।

प्रजयेति प्र – जया । सह । रायः । पोषेण । इति । आह ।

आशिषमित्या – शिषम् । एव । एताम् । एति । शास्ते । आपः ।

देवीः । शुद्धायुव इति शुद्ध – युवः । इति । आह ।

यथायजुरिति यथा – यजुः । एव । एतत् ॥ **44 (37)**

*(लोकाय नीयते यद् – बर्.ही – रश्मयः – सप्तत्रिꣳशच्च) (A8)*

**TS 6.3.9.1**

पशोर्वा आलब्धस्य प्राणाञ्छुगृच्छति वाक् त आ प्यायतां प्राणस्त

आ प्यायतामित्याह प्राणेभ्य एवास्य शुचꣳ शमयति सा प्राणेभ्यो

ऽधि पृथिवीꣳ शुक् प्र विशति शमहोभ्यामिति नि

नयत्यहोरात्राभ्यामेव पृथिव्यै शुचꣳ शमयत्योषधे त्रायस्वैनꣳ स्वधिते

मैनꣳ हिꣳसीरित्याह वज्रो वै स्वधितिः– [ ] **45**

**TS 6.3.9.1 - Padam**

पशोः । वै । आलब्धस्येत्या – लब्धस्य । प्राणानिति प्र – अनान् ।

शुक् । ऋच्छति । वाक् । ते । एति । प्यायताम् । प्राण इति

प्र – अनः । ते । एति । प्यायताम् । इति । आह । प्राणेभ्य इति

प्र – अनेभ्यः । एव । अस्य । शुचम् । शमयति । सा ।

प्राणेभ्य इति प्र – अनेभ्यः । अधीति । पृथिवीम् । शुक् । प्रेति ।

विशति । शम् । अहोभ्यामित्यहः – भ्याम् । इति । नीति । नयति ।

अहोरात्राभ्यामित्यहः–रात्राभ्याम् । एव । पृथिव्यै । शुचम् । शमयति ।

ओषधे । त्रायस्व । एनम् । स्वधित इति स्व – धिते । मा । एनम् ।

हि॒ꣳसीः । इति । आह । वज्रः । वै ।

स्वधितिरिति स्व – धितिः । **45 (50)**

**<u>TS 6.3.9.2</u>**

शान्त्यै पार्श्वत आ च्छ्यति मद्ध्यतो हि मनुष्या आ च्छ्यन्ति

तिरश्चीनमा च्छ्यत्यनूचीनꣳ हि मनुष्या आच्छ्यन्ति व्यावृत्त्यै रक्षसां

भागो ऽसीति स्थविमतो बर्.हिरक्त्वाऽपास्यत्यस्नैव रक्षाꣳसि

निरवदयत इदमहꣳ रक्षोऽधमं तमो नयामि योऽस्मान् द्वेष्टि यं च

वयं द्विष्म इत्याह द्वौ वाव पुरुषौ यं चैव– [ ] **46**

**TS 6.3.9.2 - Padam**

शान्त्यै । पार्श्वतः । एति । छ्यति । मद्ध्यतः । हि । मनुष्याः ।
आच्छयन्तीत्या–छ्यन्ति । तिरश्चीनम् । एति । छ्यति । अनूचीनम् ।
हि । मनुष्याः । आच्छ्यन्तीत्या – छ्यन्ति । व्यावृत्त्या इति
वि – आवृत्त्यै । रक्षसाम् । भागः । असि । इति । स्थविमतः ।
बर्.हिः । अक्त्वा । अपेति । अस्यति । अस्ना । एव । रक्षाꣳसि ।
निरवदयत इति निः – अवदयते । इदम् । अहम् । रक्षः । अधमम् ।
तमः । नयामि । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः ।
इति । आह । द्वौ । वाव । पुरुषौ । यम् । च । एव । **46 (50)**

**TS 6.3.9.3**

द्वेष्टि यश्चैनं द्वेष्टि तावुभावधमं तमो नयतीषे त्वेति
वपामुत् खिदतीच्छत इव ह्येष यो यजते यदुपतृन्द्याद्–रुद्रो ऽस्य
पशून् घातुकः स्याद् यन्नोपतृन्द्या–दयता स्या–दन्ययोपतृणत्त्यन्यया
न धृत्यै घृतेन द्यावापृथिवी प्रोर्णुवाथामित्याह द्यावापृथिवी एव
रसेनानक्त्यच्छिन्नो– [ ] **47**

**TS 6.3.9.3 - Padam**

द्वेष्टि । यः । च । एनम् । द्वेष्टि । तौ । उभौ । अधमम् । तमः ।
नयति । इषे । त्वा । इति । वपाम् । उदिति । खिदति । इच्छते ।
इव । हि । एषः । यः । यजते । यत् । उपतृन्द्यादित्युप – तृन्द्यात् ।
रुद्रः । अस्य । पशून् । घातुकः । स्यात् । यत् । न ।
उपतृन्द्यादित्युप – तृन्द्यात् । अयता । स्यात् । अन्यया ।
उपतृणत्तीत्युप – तृणत्ति । अन्यया । न । धृत्यै । घृतेन ।
द्यावापृथिवी इति द्यावा–पृथिवी । प्रेति । ऊर्णाथाम् । इति । आह ।
द्यावापृथिवी इति द्यावा – पृथिवी । एव । रसेन । अनक्ति ।
अच्छिन्नः । **47 (50)**

**TS 6.3.9.4**

रायः सुवीर इत्याह यथायजुरेवैतत् क्रूरमिव वा एतत् करोति
यद् वपा–मुत्खिद–त्युर्वन्तरिक्ष–मन्विहीत्याह शान्त्यै प्र वा
एषोऽस्माल्लोकाच्च्यवते यः पशुं मृत्यवे नीयमानमन्वारभते
वपाश्रपणी पुनरन्वारभतेऽस्मिन्नेव लोके प्रति तिष्ठत्यग्निना
पुरस्तादेति रक्षसामपहत्या अथो देवता एव हव्येना– [ ] **48**

**TS 6.3.9.4 - Padam**

रायः । सुवीर इति सु - वीरः । इति । आह । यथायजुरिति
यथा - यजुः । एव । एतत् । क्रूरम् । इव । वै । एतत् । करोति ।
यत् । वपाम् । उत्खिदतीत्युत् - खिदति । उरु । अन्तरिक्षम् ।
अन्विति । इहि । इति । आह । शान्त्यै । प्रेति । वै । एषः । अस्मात् ।
लोकात् । च्यवते । यः । पशुम् । मृत्यवे । नीयमानम् । अन्वारभत
इत्यनु - आरभते । वपाश्रपणी इति वपा - श्रपणी । पुनः ।
अन्वारभत इत्यनु - आरभते । अस्मिन्न् । एव । लोके । प्रतीति ।
तिष्ठति । अग्निना । पुरस्तात् । एति । रक्षसाम् ।
अपहत्या इत्यप-हत्यै । अथो इति । देवताः । एव । हव्येन । **48 (50)**

**TS 6.3.9.5**

-न्वेति नान्तममङ्गारमति हरेद् यदन्तममङ्गार-मतिहरेद्-देवता अति
मन्येत वायो वीहि स्तोकानामित्याह तस्माद् विभक्ताः स्तोका अव
पद्यन्ते ऽग्रं ँवा एतत् पशूनां ँयद् वपाऽग्रमोषधीनां बर्.हिरग्रेणैवाग्र७ं

समर्द्धयत्यथो ओषधीष्वेव पशून् प्रति ष्ठापयति स्वाहाकृतीभ्यः प्रेष्येत्याह– [ ] 49

**TS 6.3.9.5 - Padam**

अन्विति । एति । न । अन्तमम् । अङ्गारम् । अतीति । हरेत् । यत् । अन्तमम् । अङ्गारम् । अतिहरेदित्यति – हरेत् । देवताः । अतीति । मन्येत । वायो इति । वीति । इहि । स्तोकानाम् । इति । आह । तस्मात् । विभक्ता इति वि – भक्ताः । स्तोकाः । अवेति । पद्यन्ते । अग्रम् । वै । एतत् । पशूनाम् । यत् । वपा । अग्रम् । ओषधीनाम् । बर्.हिः । अग्रेण । एव । अग्रम् । समिति । अर्द्धयति । अथो इति । ओषधीषु । एव । पशून् । प्रतीति । स्थापयति । स्वाहाकृतीभ्य इति स्वाहाकृति – भ्यः । प्रेति । इष्य । इति । आह । **49 (50)**

**TS 6.3.9.6**

यज्ञस्य समिष्ट्यै प्राणापानौ वा एतौ पशूनां ँयत् पृषदाज्यमात्मा वपा पृषदाज्यमभिघार्य वपामभि घारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति स्वाहोर्द्ध्वनभसं मारुतं गच्छतमित्याहोर्द्ध्वनभा ह स्म वै मारुतो

देवानां ँवपाश्रपणी प्र हरति तेनैवैने प्र हरति विषूची प्र हरति तस्माद् विष्वञ्चौ प्राणापानौ ॥ 50

**TS 6.3.9.6 - Padam**

यज्ञस्य । समिष्ट्या इति सं–इष्ट्यै । प्राणापानाविति प्राण–अपानौ । वै । एतौ । पशूनाम् । यत् । पृषदाज्यमिति पृषत् – आज्यम् । आत्मा । वपा । पृषदाज्यमिति पृषत् – आज्यम् । अभिघार्येत्यभि – घार्य । वपाम् । अभीति । घारयति । आत्मन्न् । एव । पशूनाम् । प्राणापानाविति प्राण – अपानौ । दधाति । स्वाहा । ऊर्द्ध्वनभसमित्यूर्द्ध्व – नभसम् । मारुतम् । गच्छतम् । इति । आह । ऊर्द्ध्वनभा इत्यूर्द्ध्व – नभाः । ह । स्म । वै । मारुतः । देवानाम् । वपाश्रपणी इति वपा – श्रपणी । प्रेति । हरति । तेन । एव । एने इति । प्रेति । हरति । विषूची इति । प्रेति । हरति । तस्मात् । विष्वञ्चौ । प्राणापानाविति प्राण – अपानौ ॥ 50 (46)

***(स्वधिति – श्चैवा – च्छिन्नो – हव्येने – ष्येत्याह – षट्चत्वारिꣳशच्च) (A9)***

**TS 6.3.10.1**

पशुमालभ्य पुरोडाशं निर्वपति समेधमेवैनमा लभते वपया

प्रचर्य पुरोडाशेन प्र चरत्यूर्ग्वै पुरोडाश ऊर्जमेव पशूनां

मद्ध्यतो दधात्यथो पशोरेव छिद्रमपि दधाति पृषदाज्यस्योपहत्य

त्रिः पृच्छति शृतꣳ हवी(3)ः शमितरिति त्रिषत्या हि देवा यो ऽशृतꣳ

शृतमाह स एनसा प्राणापानौ वा एतौ पशूनां– [ ] **51**

**TS 6.3.10.1 - Padam**

पशुम् । आलभ्येत्या – लभ्य । पुरोडाशम् । निरिति । वपति ।

समेधमिति स – मेधम् । एव । एनम् । एति । लभते । वपया ।

प्रचर्येति प्र–चर्य । पुरोडाशेन । प्रेति । चरति । ऊर्क् । वै ।

पुरोडाशः । ऊर्जम् । एव । पशूनाम् । मद्ध्यतः । दधाति ।

अथो इति । पशोः । एव । छिद्रम् । अपीति । दधाति ।

पृषदाज्यस्येति पृषत् – आज्यस्य । उपहत्येत्युप – हत्य । त्रिः ।

पृच्छति । शृतम् । हवी(3)ः । शमितः । इति । त्रिषत्या इति

त्रि – सत्याः । हि । देवाः । यः । अशृतम् । शृतम् । आह । सः ।

एनसा । प्राणापानाविति प्राण – अपानौ । वै । एतौ । पशूनां । **51 (50)**

**TS 6.3.10.2**

यँत् पृषदाज्यं पशोः खलु वा आलब्धस्य हृदयमात्माऽभि समेति
यत् पृषदाज्येन हृदय–मभिघारयत्यात्मन्नेव पशूनां प्राणापानौ दधाति
पशुना वै देवाः सुवर्गं ँलोकमायन् ते ऽमन्यन्त मनुष्या
नोऽन्वाभविष्यन्तीति तस्य शिरः छित्त्वा मेधं प्राक्षारयन्थ् स
प्रक्षो ऽभवत् तत् प्रक्षस्य प्रक्षत्वं ँयत् प्लक्षशाखो–त्तरबर्.हि–र्भवति
समेधस्यैव– [ ] **52**

**TS 6.3.10.2 - Padam**

यत् । पृषदाज्यमिति पृषत् – आज्यम् । पशोः । खलु । वै ।
आलब्धस्येत्या – लब्धस्य । हृदयम् । आत्मा । अभि । समिति ।
एति । यत् । पृषदाज्येनेति पृषत् – आज्येन । हृदयम् ।
अभिघारयतीत्यभि – घारयति । आत्मन्न् । एव । पशूनाम् ।
प्राणापानाविति प्राण – अपानौ । दधाति । पशुना । वै । देवाः ।
सुवर्गमिति सुवः – गम् । लोकम् । आयन्न् । ते । अमन्यन्त ।
मनुष्याः । नः । अन्वाभविष्यन्तीत्यनु–आभविष्यन्ति । इति । तस्य ।

शिरः । छित्त्वा । मेधम् । प्रेति । अक्षारयन्न् । सः । प्रक्षः । अभवत् ।
तत् । प्रक्षस्य । प्रक्षत्वमिति प्रक्ष - त्वम् । यत् । प्लक्षशाखेति
प्लक्ष - शाखा । उत्तरबर्.हिरित्युत्तर - बर्.हिः । भवति ।
समेधस्येति स - मेधस्य । एव । **52 (50)**

**TS 6.3.10.3**

पशोरव द्यति पशुं ँवै ह्रियमाणꣳ रक्षाꣳस्यनु सचन्तेऽन्तरा यूपं
चाऽऽहवनीयं च हरति रक्षसामपहत्यै पशोर्वा आलब्धस्य मनोऽप
क्रामति मनोतायै हविषोऽवदीयमानस्यानु ब्रूहीत्याह मन एवास्याव
रुन्ध एकादशावदानान्यव द्यति दश वै पशोः प्राणा आत्मैकादशो
यावानेव पशुस्तस्याव- [ ] **53**

**TS 6.3.10.3 - Padam**

पशोः । अवेति । द्यति । पशुम् । वै । ह्रियमाणम् । रक्षाꣳसि ।
अन्विति । सचन्ते । अन्तरा । यूपम् । च ।
आहवनीयमित्या - हवनीयम् । च । हरति । रक्षसाम् ।
अपहत्या इत्यप - हत्यै । पशोः । वै । आलब्धस्येत्या - लब्धस्य ।
मनः । अपेति । क्रामति । मनोतायै । हविषः ।

अवदीयमानस्येत्यव - दीयमानस्य । अन्विति । ब्रूहि । इति । आह । मनः । एव । अस्य । अवेति । रुन्धे । एकादश ।

अवदानानीत्यव - दानानि । अवेति । द्यति । दश । वै । पशोः । प्राणा इति प्र - अनाः । आत्मा । एकादशः । यावान् । एव । पशुः । तस्य । अवेति । **53 (50)**

**TS 6.3.10.4**

द्यति हृदयस्याग्रे ऽव द्यत्यथ जिह्वाया अथ वक्षसो यद्-वै हृदयेनाभिगच्छति तज्जिह्वया वदति यज्जिह्वया वदति तदुरसो ऽधि निर्वदत्येतद्-वै पशोर्यथापूर्वँ यस्यैव-मवदाय यथाकाम-मुत्तरेषामवद्यति यथा पूर्वमेवास्य पशोरवत्तं भवति मद्ध्यतो गुदस्याव द्यति मद्ध्यतो हि प्राण उत्तमस्याव द्यत्यु- [ ] **54**

**TS 6.3.10.4 - Padam**

द्यति । हृदयस्य । अग्रे । अवेति । द्यति । अथ । जिह्वायाः । अथ । वक्षसः । यत् । वै । हृदयेन । अभिगच्छतीत्यभि - गच्छति । तत् । जिह्वया । वदति । यत् । जिह्वया । वदति । तत् । उरसः ।

अधि । निरिति । वदति । एतत् । वै । पशोः । यथापूर्वमिति
यथा - पूर्वम् । यस्य । एवम् । अवदायेत्यव - दाय ।
यथाकाममिति यथा - कामम् । उत्तरेषामित्युत् - तरेषाम् ।
अवद्यतीत्यव - द्यति । यथापूर्वमिति यथा - पूर्वम् । एव । अस्य ।
पशोः । अवत्तम् । भवति । मद्ध्यतः । गुदस्य । अवेति । द्यति ।
मद्ध्यतः । हि । प्राण इति प्र - अनः । उत्तमस्येत्युत् - तमस्य ।
अवेति । द्यति । **54 (50)**

**TS 6.3.10.5**

-त्तमो हि प्राणो यदीतरं ँयदीतर-मुभयमेवाजामि जायमानो वै
ब्राह्मणस्त्रिभिर्. ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया
पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी तदवदानैरेवाव
दयते तदवदानाना-मवदानत्वं देवासुराः सँयत्ता आसन् ते देवा
अग्निमब्रुवन् त्वया वीरेणासुरानभि भवामेति- [ ] **55**

**TS 6.3.10.5 - Padam**

उत्तम इत्युत् - तमः । हि । प्राण इति प्र - अनः । यदि । इतरम् ।
यदि । इतरम् । उभयम् । एव । अजामि । जायमानः । वै । ब्राह्मणः ।

त्रिभिरिति त्रि – भिः । ऋणवेत्यृण – वा । जायते । ब्रह्मचर्येणेति
ब्रह्म – चर्येण । ऋषिभ्य इत्यृषि – भ्यः । यज्ञेन । देवेभ्यः ।
प्रजयेति प्र – जया । पितृभ्य इति पितृ – भ्यः । एषः । वै ।
अनृणः । यः । पुत्री । यज्वा । ब्रह्मचारिवासीति ब्रह्मचारि – वासी ।
तत् । अवदानैरित्यव – दानैः । एव । अवेति । दयते । तत् ।
अवदानानामित्यव – दानानाम् । अवदानत्वमित्यवदान – त्वम् ।
देवासुरा इति देव – असुराः । सँयत्ता इति सं – यत्ताः । आसन्न् ।
ते । देवाः । अग्निम् । अब्रुवन्न् । त्वया । वीरेण । असुरान् ।
अभीति । भवाम । इति । **55 (50)**

**TS 6.3.10.6**

सो ऽब्रवीद् वरं वृणै पशोरुद्धारमुद्धरा इति स एतमुद्धारमुदहरत
दोः पूर्वार्द्धस्य गुदं मद्ध्यतः श्रोणिं जघनार्द्धस्य ततो देवा अभवन्
परा ऽसुरा यत् त्र्यङ्गाणाᳪ समवद्यति भ्रातृव्याभिभूत्यै भवत्यात्मना
परा ऽस्य भ्रातृव्यो भवत्यक्ष्णया ऽव द्यति तस्मादक्ष्णया पशवो ऽङ्गानि
प्र हरन्ति प्रतिष्ठित्यै ॥ **56**

**TS 6.3.10.6 - Padam**

सः । अब्रवीत् । वरम् । वृणै । पशोः । उद्धारमित्युत् – हारम् ।
उदिति । हरै । इति । सः । एतम् । उद्धारमित्युत् – हारम् । उदिति ।
अहरत । दोः । पूर्वार्द्धस्येति पूर्व – अर्द्धस्य । गुदम् । मद्ध्यतः ।
श्रोणिम् । जघनार्द्धस्येति जघन–अर्द्धस्य । ततः । देवाः ।
अभवन्न् । परेति । असुराः । यत् । त्र्यङ्गाणामिति त्रि – अङ्गानाम् ।
समवद्यतीति सं – अवद्यति । भ्रातृव्याभिभूत्या इति
भ्रातृव्य–अभिभूत्यै । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः ।
भवति । अक्ष्णया । अवेति । द्यति । तस्मात् । अक्ष्णया । पशवः ।
अङ्गानि । प्रेति । हरन्ति । प्रतिष्ठित्या इति प्रति – स्थित्यै ॥ **56 (45)**

*(एतौ पशूना᳚ – समेधस्यैव – तस्याऽवो – त्तमस्याव द्यती – ति – पञ्चचत्वारि᳚शच्च) (A10)*

**TS 6.3.11.1**

मेदसा स्रुचौ प्रोर्णोति मेदोरूपा वै पशवो रूपमेव पशुषु दधाति
यूषन्नवधाय प्रोर्णोति रसो वा एष पशूनां ँयद्–यू रसमेव पशुषु
दधाति पार्श्वेन वसाहोमं प्र यौति मद्ध्यं ँवा एतत् पशूनां ँयत्

पार्श्व॑ँ रस॑ एष प॑शूनां ँयद्–वसा यत् पार्श्वे॑न वसाहोमं प्रयौति

मद्ध्यत एव प॑शूना॑ँ रसं दधाति घ्नन्ति– [ ] **57**

**TS 6.3.11.1 - Padam**

मे॑दसा । स्रुचौ । प्रेति । ऊर्णोति । मे॑दोरूपा इति मेदः – रूपाः ।

वै । पश॑वः । रूपम् । एव । पशु॑षु । दधाति । यूषन्न् ।

अवधायेत्यव–धाय । प्रेति । ऊर्णोति । रसः । वै । एषः । पशूनाम् ।

यत् । यूः । रसम् । एव । पशु॑षु । दधाति । पार्श्वेन । वसाहोममिति

वसा – होमम् । प्रेति । यौति । मद्ध्यम् । वै । एतत् । पशूनाम् ।

यत् । पार्श्वम् । रसः । एषः । पशूनाम् । यत् । वसा । यत् ।

पार्श्वे॑न । वसाहो॑ममिति वसा – होमम् । प्रयौतीति प्र – यौति ।

मद्ध्यतः । एव । पशूनाम् । रसम् । दधाति । घ्नन्ति । **57 (50)**

**TS 6.3.11.2**

वा एतत् पशुं ँयथ् सं.ज्ञपयन्त्यैन्द्रः खलु वै देवतया प्राण

ऐन्द्रो ऽपान ऐन्द्रः प्राणो अङ्गेअङ्गे नि देद्ध्यदित्याह प्राणापानावेव

पशुषु दधाति देव त्वष्टर्भूरि ते स॑ँसमेत्वित्याह त्वाष्ट्रा हि

देवतया पशवो विषुरूपा यथ् सलक्ष्माणो भवथेत्याह विषुरूपा ह्येते सन्तः सलक्ष्माण एतर्.हि भवन्ति देवत्रा यन्त– [ ] **58**

**TS 6.3.11.2 - Padam**

वै । एतत् । पशुम् । यत् । सं.ज्ञपयन्तीति सं. – ज्ञपयन्ति । ऐन्द्रः । खलु । वै । देवतया । प्राण इति प्र – अनः । ऐन्द्रः । अपान इत्यप –अनः । ऐन्द्रः । प्राण इति प्र – अनः । अङ्गेअङ्ग इत्यङ्गे – अङ्गे । नीति । देद्ध्यत् । इति । आह । प्राणापानाविति प्राण – अपानौ । एव । पशुषु । दधाति । देव । त्वष्टः । भूरि । ते । स<sub>ं</sub>समिति सं–सम् । एतु । इति । आह । त्वाष्ट्राः । हि । देवतया । पशवः । विषुरूपा इति विषु – रूपाः । यत् । सलक्ष्माण इति स–लक्ष्माणः । भवथ । इति । आह । विषुरूपा इति विषु–रूपाः । हि । एते । सन्तः । सलक्ष्माण इति स – लक्ष्माणः । एतर्.हि । भवन्ति । देवत्रेति देव – त्रा । यन्तम् । **58 (50)**

**TS 6.3.11.3**

–मवसे सखायोऽनु त्वा माता पितरो मदन्त्वित्याहा–नुमतमेवैनं मात्रा पित्रा सुवर्गं ँलोकं गमयत्यर्द्धधर्चे वसाहोमं जुहोत्यसौ वा

अर्द्धर्च इयमर्द्धर्च इमे एव रसेनानक्ति दिशो जुहोति दिश एव रसेनानक्त्यथो दिग्भ्य एवोर्ज७ं रसमव रुन्धे प्राणापानौ वा एतौ पशूनां ँयत् पृषदाज्यं ँवानस्पत्याः खलु– [ ] **59**

**TS 6.3.11.3 - Padam**

अवसे । सखायः । अन्विति । त्वा । माता । पितरः । मदन्तु । इति । आह । अनुमतमित्यनु – मतम् । एव । एनम् । मात्रा । पित्रा । सुवर्गमिति सुवः – गम् । लोकम् । गमयति । अर्द्धर्च इत्यर्द्ध–ऋचे । वसाहोममिति वसा – होमम् । जुहोति । असौ । वै । अर्द्धर्च इत्यर्द्ध–ऋचः । इयम् । अर्द्धर्च इत्यर्द्ध – ऋचः । इमे इति । एव । रसेन । अनक्ति । दिशः । जुहोति । दिशः । एव । रसेन । अनक्ति । अथो इति । दिग्भ्य इति दिक् – भ्यः । एव । ऊर्जम् । रसम् । अवेति । रुन्धे । प्राणापानाविति प्राण – अपानौ । वै । एतौ । पशूनाम् । यत् । पृषदाज्यमिति पृषत् – आज्यम् । वानस्पत्याः । खलु । **59 (50)**

**TS 6.3.11.4**

वै देवतया पशवो यत् पृषदाज्यस्यो-पहत्याऽऽह वनस्पतये ऽनु ब्रूहि वनस्पतये प्रेष्येति प्राणापानावेव पशुषु दधात्यन्यस्यान्यस्य समवत्त७ं समवद्यति तस्मान्नानारूपाः पशवो यूष्णोप सिञ्चति रसो वा एष पशूनां ँयद्-यू रसमेव पशुषु दधातीडामुप ह्वयते पशवो वा इडा पशूनेवोप ह्वयते चतुरुप ह्वयते- [ ] **60**

**TS 6.3.11.4 - Padam**

वै । देवतया । पशवः । यत् । पृषदाज्यस्येति पृषत् - आज्यस्य । उपहत्येत्युप - हत्य । आह । वनस्पतये । अन्विति । ब्रूहि । वनस्पतये । प्रेति । इष्य । इति । प्राणापानाविति प्राण - अपानौ । एव । पशुषु । दधाति । अन्यस्यान्यस्येत्यन्यस्य - अन्यस्य । समवत्तमिति सं - अवत्तम् । समवद्यतीति सं-अवद्यति । तस्मात् । नानारूपा इति नाना-रूपाः । पशवः । यूष्णा । उपेति । सिञ्चति । रसः । वै । एषः । पशूनाम् । यत् । यूः । रसम् । एव । पशुषु । दधाति । इडाम् । उपेति । ह्वयते । पशवः । वै । इडा । पशून् । एव । उपेति । ह्वयते । चतुः । उपेति । ह्वयते । **60 (50)**

**TS 6.3.11.5**

चतुष्पादो हि पशवो यं कामयेतापशुः स्यादित्यमेदस्कं तस्मा आ दद्ध्यान्मेदोरूपा वै पशवो रूपेणैवैनं पशुभ्यो निर्भजत्यपशुरेव भवति यं कामयेत पशुमान्थ् स्यादिति मेदस्वत् तस्मा आ दद्ध्यान्मेदोरूपा वै पशवो रूपेणैवास्मै पशूनव रुन्धे पशुमानेव भवति प्रजापतिर्यज्ञमसृजत स आज्यं– [ ] **61**

**TS 6.3.11.5 - Padam**

चतुष्पाद इति चतुः – पादः । हि । पशवः । यम् । कामयेत । अपशुः । स्यात् । इति । अमेदस्कमित्यमेदः–कम् । तस्मै । एति । दद्ध्यात् । मेदोरूपा इति मेदः–रूपाः । वै । पशवः । रूपेण । एव । एनम् । पशुभ्य इति पशु–भ्यः । निरिति । भजति । अपशुः । एव । भवति । यम् । कामयेत । पशुमानिति पशु – मान् । स्यात् । इति । मेदस्वत् । तस्मै । एति । दद्ध्यात् । मेदोरूपा इति मेदः – रूपाः । वै । पशवः । रूपेण । एव । अस्मै । पशून् । अवेति । रुन्धे । पशुमानिति पशु – मान् । एव । भवति ।

प्रजापतिरिति प्रजा–पतिः । यज्ञम् । असृजत । सः ।

आज्यं । **61 (50)**

**TS 6.3.11.6**

पुरस्तादसृजत पशुं मद्ध्यतः पृषदाज्यं पश्चात् तस्मादाज्येन प्रयाजा इज्यन्ते पशुना मद्ध्यतः पृषदाज्येना–नूयाजा–स्तस्मादेतन्मिश्रमिव पश्चाथ्सृष्ट७ ह्येकादशानूयाजान्. यजति दश वै पशोः प्राणा आत्मैकादशो यावानेव पशुस्तमनु यजति घ्नन्ति वा एतत् पशुं ँयथ् सं.ज्ञपयन्ति प्राणापानौ खलु वा एतौ पशूनां ँयत् पृषदाज्यं ँयत् पृषदाज्येना ( ) नूयाजान्. यजति प्राणापानावेव पशुषु दधाति ॥ **62**

**TS 6.3.11.6 - Padam**

पुरस्तात् । असृजत । पशुम् । मद्ध्यतः । पृषदाज्यमिति पृषत् – आज्यम् । पश्चात् । तस्मात् । आज्येन । प्रयाजा इति प्र – याजाः । इज्यन्ते । पशुना । मद्ध्यतः । पृषदाज्येनेति पृषत् – आज्येन । अनूयाजा इत्यनु – याजाः । तस्मात् । एतत् । मिश्रम् । इव । पश्चाथ्सृष्टमिति पश्चात् – सृष्टम् ।

हि । एकादश । अनूयाजानित्यनु – याजान् । यजति । दश ।

वै । पशोः । प्राणा इति प्र – अनाः । आत्मा । एकादशः । यावान् ।

एव । पशुः । तम् । अन्विति । यजति । घ्नन्ति । वै । एतत् ।

पशुम् । यत् । सं.ज्ञपयन्तीति सं. – ज्ञपयन्ति । प्राणापानाविति

प्राण – अपानौ । खलु । वै । एतौ । पशूनाम् । यत् ।

पृषदाज्यमिति पृषत् – आज्यम् । यत् । पृषदाज्येनेति

पृषत् – आज्येन ( ) । अनूयाजानित्यनु – याजान् । यजति ।

प्राणापानाविति प्राण – अपानौ । एव । पशुषु । दधाति ॥ **62 (56)**

***(घ्नन्ति – यन्तं – खलु – चतुरुप ह्वयत – आज्यं – यँत्***

***पृषदाज्येन – षट् च) (A11)***

====================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(चात्वालाथ् – सुवर्गाय यद् वैसर्जनानि – वैष्णव्यर्चा – पृथिव्यै – साध्या – इषे त्वे – त्यग्निना – पर्यग्नि – पशोः – पशुमालभ्य – मेदसा स्रुचा – वेकादश)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(चात्वालाद् – देवानुपैति – मुञ्चति – प्रह्रियमाणाय – पर्यग्नि – पशुमालभ्य – चतुष्पादो – द्विषष्टिः)

**First and Last Padam of Third Prasnam of 6th Kandam**

(चात्वालात् – पशुषु दधाति)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

षष्ठकाण्डे तृतीयः प्रश्नः समाप्तः ॥

------------------------------------

**Details of Panchati and Padam for Kandam 6 , Prasanam 3 (TS 6.3)**

| | Panchati | Padams |
|---|---|---|
| **Anuvakam 1** | **6** | **314** |
| **Anuvakam 2** | **6** | **300** |
| **Anuvakam 3** | **6** | **319** |
| **Anuvakam 4** | **9** | **442** |
| **Anuvakam 5** | **4** | **218** |
| **Anuvakam 6** | **4** | **210** |
| **Anuvakam 7** | **5** | **268** |
| **Anuvakam 8** | **4** | **187** |
| **Anuvakam 9** | **6** | **296** |
| **Anuvakam 10** | **6** | **295** |
| **Anuvakam 11** | **6** | **306** |
| **Total →** | **62** | **3155** |

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**